श्रीरामकथा

प्रो. चौडूरि उपेन्द्र राव

श्रीरामकथा
प्रो. चौडूरि उपेन्द्र राव

श्रीरामकथा

प्रो० चौडूरि उपेन्द्र रावः

श्री राम जय राम जय जय राम !

श्रीरामकथा

प्रो० चौडूरि उपेन्द्र राव:
जवाहरलाल नेहरू विश्वविद्यालय:
नवदिल्ली

न्यू भारतीय बुक कॉरपोरेशन
दिल्ली : : भारत

मुद्रक :
न्यू भारतीय बुक कॉरपोरेशन
208, 2nd -फ्लोर
4735/22, प्रकाशदीप बिल्डिंग
अन्सारी रोड, दरियागंज,
नई दिल्ली-110002
फोन : 23280214, 23280209, 49841634
E-mail : deepak.nbbc@yahoo.in

प्रथम संस्करण : 2023

मूल्य : अमूल्यम्

© लेखक

टाईप सेटिंग : **एस० के० ग्राफिक्स**
दिल्ली–84

Website : www.kamakoti.org.
Email : kanchimutt@gmail.com

Contact : 044-27222116
Acts : 044-27224236
Cell : 9445421115



||Sri Chandramouleeswaraya Nama:||

Sri Sankara Bhaghavadpadacharya Paramparagatha Moolamnaya Sarvajnapeeta

His Holiness Sri Kanchi Kamakoti Peetadhipathi

JAGADGURU SRI SANKARACHARYA SWAMIGAL

Srimatam Samsthanam

No. 1, Salai Street, Kancheepuram - 631 502, Tamilnadu State, INDIA.

भगवतः धर्ममूर्तेः सीतासद्वितीयस्य रामस्य कथा आदिकविना वाल्मीकिना आदौ कीर्तिता। ततः परं सुबहवो भक्ताः बह्वीषु भाषासु तां न केवलम् अन्ववदन् प्रत्युत सम्भवद्भिः पुराणादिभिः मूलान्तरैः क्वचित् क्वचित् विलक्षणतया प्रतिपादयन्तो बहुधा प्रापञ्चयन्नपि। तदेवं न केवलं भारते प्रत्युत भारतीयसंस्कृतेः प्रभावः यावद् दूरम् आसीत् तावत् पारेसमुद्रमपि द्वीपान्तरेषु रामायणकथा प्रसरीसर्ति स्म।

तत्र द्रविडभाषाया अपि भारतीयसंस्कृतिपरिपालने महद् अवदानं वर्तते। ''द्राविडं यन्मुदा मह्यं पुरा प्रोक्तं पुरारिणा'' इति महर्षिः अगस्त्यः वसिष्ठादीन् प्रति गङ्गातीरे वदति इति हालास्यक्षेत्रमाहात्म्ये दृश्यते। तदेवं प्राचीनद्रविडभाषाया अपि देवमूलत्वं पुराणप्रमाणत एव सिद्धम्। ततः शाखा इव प्रसृता अद्य बह्व्यो द्राविड्यो भाषाः स्वीयं देवमूलत्वम् अनपह्नुवानाः देवभक्तिं, सनातनं भारतीयं सम्प्रदायं च पुष्णत्यो विराजन्ते। महान् हि शब्दराशिः आसु भाषासु नानाविधरूपेण भगवद्गुणानां प्रकाशको वर्तते। सर्वाश्च एता भाषाः संस्कृतसंस्कृतिसंवलिता एव वर्तन्ते चेदपि एतद्भाषागतासु रचनासु संस्कृते अविद्यमान-प्रकाराः स्वारसिकाः ग्रन्थाः दृश्यन्ते इत्यतः आभ्यो भाषाभ्यः संस्कृते अनुवादोऽपि स्थाने एव भवति।

तत्रैवं विशिष्य यत् कम्बनाट्टाळ्वार इति सगौरवम् अभिधीयमानेन कविना द्रविडभाषायां चिराद् विरचितं रामावताराख्यं रामायणं तस्य भाषाप्राचीनतया अद्यतनैः अनतिसुबोधताम् अभिलक्ष्य कोयम्बत्तूरुनगरवास्तव्येन श्रीमता गोपालेन सङ्क्षिप्तकम्बरामायणं सरलद्रविडभाषायां निबद्धं, तस्य च संस्कृतलोकाय प्रदित्सया श्रीमता चौडूरि उपेन्द्ररावेण अनूदितं, श्रीमतः तनिकेल्ल-विजयमूर्तेः साहाय्येन अधुना प्रकाश्यते च इत्येतद् रामभक्तलोकानां संस्कृताभिमानिलोकानां च निश्चयेन मोदावहं भवति।

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।

तावद् रामायणकथा लोकेषु प्रचरिष्यति॥

इति चेदं तस्यैव आदिकवेः वचनम् अनेन सत्यापितं भवति। सत्कार्येऽस्मिन् सहोद्यतानां लेखकानाम् अनुवादकानां प्रकाशकानाम् अन्येषां च उपकारकाणां रामभक्तिवृद्धिं सश्रेयः प्रयोजनं प्रदेयाद् भगवान् महात्रिपुरसुन्दरीसमेतः चन्द्रमौलीश्वरः इत्याशास्महे।

नारायणस्मृतिः ।

चातुर्मास्यस्थानम् - काकिनाडा

शाङ्करवर्षम् २५३१ शुभकृत्संवत्सरस्य

सिंहश्रावणकृष्णैकादशी इन्दुवासरः

प्रो. डॉ. चौडूरि उपेन्द्र राव महोदयानां परिचयः

प्रो. डॉ. चौडूरि उपेन्द्र राववर्याः विश्व-प्रसिद्धस्य जवाहरलाल नेहरू विश्वविद्यालयस्य संस्कृतप्राच्य-विद्याध्ययनसंस्थाने वरिष्ठाचार्यरूपेण कार्यरतास्सन्ति। एते विशिष्टसंस्कृताध्ययनकेन्द्रस्य अध्यक्षपदमपि समलंकृतवन्तः। कम्बोडिया-राष्ट्रस्य ''राजा सीहनूक-बौद्धविश्वविद्यालये'' भारतीयसंस्कृतिकसम्बन्धपरिषदा (I.C.C.R) इमे अभ्यागताचार्यरूपेणाऽपि नियिक्ताः 2016 तमे वर्षे। प्रो. राव महोदयाः देशस्य तादृशेषु विशिष्टसंस्कृतविद्वत्सु एके सन्ति, येषामवदानं संस्कृतस्य विविधक्षेत्रेषु अनुसन्धानकार्येषु, संस्कृतस्य प्रचारक्षेत्रे च अतुलनीयं वर्तते। वैदेशिकेषु, विश्वविद्यालयेष्वपि अभ्यागताचार्यत्वेन अमी कार्यरताः आसन्।

प्रो. राव-महोदयानां नैके शोधलेखाः राष्ट्रियाऽन्ताराष्ट्रियशोधपत्रिकासु प्रकाशिताः। भवद्भिः संस्कृत-हिन्दी-तेलुगु-आङ्गलभाषासु 30 संख्याकानि पुस्तकानि लिखितानि सम्पादितानि च। वर्तमानकाले भवन्तः दक्षिण-पूर्व-एशियायाः; प्रमुखतया कम्बोडियादेशस्य प्राच्यविद्यायाः विविधेषु विषयेषु, विशेषरूपेण रामायणं समाश्रित्य कार्यं कुर्वन्तः सन्ति। भवद्भिः भारतात्, अपि च विदेशस्थविभिन्नसंस्थाभ्यश्च नैके पुरस्काराः, सम्मानपत्राणि च अप्राप्यन्त।

प्रो. रावमहोदयाः संस्कृतस्य पालिभाषायाश्च विशेषज्ञाः विद्वांसः सन्ति। संस्कृतसाहित्यस्य काव्यवाङ्मयविषये, पालिभाषा-बौद्धसाहित्ययोश्च धार्मिक, दार्शनिकादिशोधकार्येषु भवतामभिरुचिर्वर्तते। भवन्तः सकुशलं नैकविधं प्राशासनिकं दायित्वं निरवहन्। भवन्तः अनेकासां शोधसमितीनाम्, तदन्यासामपि समितीनां सदस्याः वर्तन्ते । सम्प्रति रामायणस्यास्यानुवादकार्यं कृत्वा ते संस्कृतसाहित्याय महद्योगदानमकुर्वन्। तेषां सकलविधसौख्याभिवृद्धिं कामयामहे।

-प्रकाशकाः

ग्रन्थपरिचयः

तामिलभाषायां रामायणं, यज्जनमानसे परिव्याप्तं तदेव कम्बरामायण-मित्यनेन नाम्ना सुविश्रुतम्। रामायणमेतत् न केवलं महर्षेः वाल्मीकेः रामायणस्य अनुवादमात्रं वर्तते। कम्बन्वर्येण वाल्मिकिऋषिविरचिताम् अमृतां कथाम् आधारीकृत्य तस्याश्च कथायाः सर्वाण्यपि विवरणानि सूक्ष्मतया परिपालयता पूर्णतया मौलिकी साहित्यिकी कृतिः विरचिता।

श्री-एस्-गोपालन्-महोदयः इमामेव कृतिं संक्षिप्तेन सरलेन च काव्य-रूपेणानुवादमकरोत्। लोकप्रियैः कलाकारैः रामायणं समाश्रित्य विरचितानि कलात्मककार्याणि संयोजितानि विविधभाषासु। भगवते श्रीरामचन्द्राय श्रद्धाकुसुमांजलिरूपेण संस्करणमेकं प्रस्तुतं विशेषज्ञानामेकेन समूहेन।

श्रीकृष्णमूर्तिना श्रीगोपालन्-महोदयस्य काव्यकृतौ प्राद्यौगिकं, रचनात्मकञ्च कार्यं कृतम्। श्री विजयमूर्तिवर्येण संस्कृतानुवादकार्ये साहाय्यमाचरितम्।

संस्कृतभाषायामपूर्वानुवादकार्यं प्रसिद्धसंस्कृतविदुषा दिल्लीस्थ जवाहरलाल नेहरू विश्वविद्यालयाचार्येण प्रो चौडूरि उपेन्द्र रावेण कृतम्। एतेषां सर्वेषां सत्प्रयत्नेन ग्रन्थोयमधुना प्राकाश्यं नीता।

श्रीरामाय जयोऽस्तु।

प्रस्तावना

रामस्य अयनमर्थाच्चरितं रामायणम् । रामायणे रामस्य कथा समुपलभ्यते। परन्तु रामायणं कथामात्रमेव न, रामायणमेकं सुन्दरं काव्यमपि। इदमादिकाव्यं संस्कृते समुपनिबद्धम्। आदिकाव्यस्य रामायणस्य कर्ता श्रीमद्वाल्मीकिः । संस्कृतसाहित्ये रामायणमादि-काव्यमित्यत एव सर्वेषामनन्तरकाव्यानां प्रेरणास्पदं जातम्। भारतीयसम्प्रदायानुसारं रामायणं त्रेतायुगे विरचितम् । रामायणकाव्यस्य कर्ता आदिकविः वाल्मीकिः। नारदस्योपदेशात्तपस्तप्तवान् वाल्मीकिः। तस्य शरीरमावृत्य वल्मीकः उत्पन्नः, ततस्स बहिरागत इत्यतस्तस्य नाम 'वाल्मीकिः' इति जातमिति काचित् कथा श्रूयते।

रामः हनुमान्, सीता, दशरथः, जनकः, अगस्त्यः, वसिष्ठः, विश्वामित्रः, रावणः, कुम्भकर्णः, विभीषणः, इत्यादयः रामायणे प्रमुखाः। संस्कृतसाहित्ये रामायणमिव नान्यत्काव्यं लोकप्रियं प्रसिद्धञ्च विद्यत इति वक्तुं शक्यते। नीत्युपदेशात्मकतया, काव्यात्मकतया, लोकोपकारकत्वेन च रामायणस्य महत्त्वमद्वितीयं भवति। पितृधर्मस्य,

पति-पत्नीधर्मस्य, भ्रातृधर्मस्य तथा अन्यकौटुम्बिक-धर्मस्य च आदर्शभूतोऽयं ग्रन्थः।

पारम्परिकेतिहासानुसारेण मुनिर्वाल्मीकिः पूर्वं रत्नाकरनामकः कश्चिन्निषाद आसीत् । सप्तर्षीणां दर्शनानन्तरं राममन्त्रजपरूपेण तपसा रत्नाकरः वाल्मीकिः सञ्जातः । रामायणे न केवलं युद्धमात्रं, प्रत्युत प्रकृतिसौन्दर्यवर्णनादि नानाविषयाणां, धर्मस्य च प्रभूतं वर्णनं दृश्यते। संस्कृतभाषाभ्यासार्थमपि अत्यन्तोपयोगि साधनं भवतीदं काव्यम्। रामायणमादिकाव्यमिति प्रसिद्धम्। इतिहासग्रन्थ इत्यपि भाव्यते एतत्काव्यम्।

तमसानदीं स्नानार्थं गच्छन्वाल्मीकिर्व्याधेन मारितं क्रौञ्चं पश्यति। तदा शोकाकुलस्सः – 'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीस्समा' इति व्याधं शपति। ततः नारदाद्रामस्य कथां श्रुत्वा सः रामायणं रचयति। सीतारामयोर्वियोगः रामायणस्य मुख्यं कथावस्तु।

महाभारते रामायणस्य कथा वर्णिता। मुनेः पाणिनेः अष्टाध्याय्यामपि कैकेयीकौसल्यादयः शब्दाः उपलभ्यन्ते। अतः रामायणं महाभारतात्पाणिनेश्च पूर्वमासीदिति स्पष्टम्। रामायणं कदा विरचितमित्यस्मिन् विषये मतभेदास्सन्ति बहवः। तथापि एतावत्तु वक्तुं शक्यते यन्मुनिर्वाल्मीकिः रामायणं क्रीस्तेः प्राक् पञ्चशतवर्षेभ्यः पूर्वमेव काव्यमिदं रचयामासेति।

रामायणग्रंथे 24000 श्लोकाः सन्ति। रामायणस्य प्रतिसहस्रतमस्य श्लोकस्य आदौ गायत्रीमन्त्रस्य एकैकम् अक्षरं प्राप्यते। पाठभेदादयः न भवेयुः इति उद्देशेन एवं कृतं स्यात् कविना। रामायणं सर्वासु भारतीयभाषासु, बह्वीषु विदेशीयभाषासु च अनूदितम्। एतस्मात् रामायणस्य जनप्रियता अतिस्पष्टा भवति।

वाल्मीके: शैली ललिता, सरला, सुन्दरी च। श्रीरामस्य धर्मनिष्ठा, सीताया: सौशील्यं, भरतस्य भ्रातृवात्सल्यं, लक्ष्मणस्य कर्तव्यनिष्ठा, आञ्जनेयस्य कार्यदक्षता, सुग्रीवस्य सौहार्दभाव: इत्यादय: अंशा: अतिरमणीयतया चित्रिता: कविना। संस्कृतसाहित्यनिर्माणे वाल्मिकि: आदिपुरुष: इत्यत्र न अतिशयोक्ति:।

रामायणकथायां विविधरूपान्तराणि सन्ति । रामायणकथा-सम्प्रदाय: थाइलेण्ड्देशे, कम्बोडियादेशे, मलेशियादेशे, लाओसदेशे, चम्पादेशे, इण्डोनेशिया देशे प्रसिद्ध: अस्ति । मलेशियादेशे रामायणस्य रूपान्तरे रामस्य अपेक्षया लक्ष्मणायैव प्रमुखस्थानं प्रदत्तम्। विविधकालघट्टेषु अनेके कवय:, काव्यज्ञा: च रामायणमलिखन्। तत्रापि अनेकै: रामायणरूपान्तराणि विभिन्नरीत्या रचितानि। तेलुगुकविना रङ्गनाथेन 15 शतके, रामायणं विरचितम् ततो किञ्चिदिव पूर्वं कुमारवाल्मीकि: कन्नडभाषया तोरवे रामायणमलिखत् । राष्ट्रकविना कुवेम्पुमहोदयेन लिखिताय 'श्रीरामायण दर्शनं', इति नाम्ने ग्रन्थाय ज्ञानपीठप्रशस्ति: प्रदत्ता। विदुषा रङ्गनाथशर्माणा ''कन्नडवाल्मीकि रामायणम्'' विरचितम्। हिन्दीभाषया 1576 तमे वर्षे तुलसीदासेन 'श्रीरामचरितमानसम्' विरचितम् । गुजरातीभाषया प्रेमानन्दनामकेन कविना 17 शतके, बङ्गालीकविना कृत्तिवाससा 14 शतके, ओरियाकविना बलरामदासेन 16 शतके, मराठीकविना श्रीधरेण 18 शतके च रामायणावृत्तय: विरचिता:। केरलेषु स्थितानां 'मापिळ्ळे' जनानां मध्ये प्रचलितं रामायणं जानपदशैल्यां वर्तते। मुसल्मानजनानां सम्प्रदायानुसारं लिखिते अस्मिन्रामायणे कथानायक: मुस्लिं सुल्तान:। तत्र रामस्य नामान्तरं 'लामस्' इति स्थापितम्। परन्तु अन्यानि सर्वाण्यपि कथापात्राणि यथावत् सन्ति ।

तथैव 12 शतके तमिळभाषया कविः कम्बः 'कम्बरामायणम्' अथवा 'रामावतारम्' अरचयत्। रामायणस्य उपरूपान्तरेषु एतदेकम् अन्तर्भवति यत् रावणस्य दुष्टसोदरौ अहिरावणः महिरावणः च रामलक्ष्मणौ कालीमातुः कृते बलिप्रदानय आनयतः। अस्यां कथायां हनुमतः पात्रं महत्वपूर्णं भवति। सः एव रामलक्ष्मणौ रक्षति। अन्ये बहुवः विशेषाः कम्बरामायणे सन्ति। रामकथा एषा तस्यैव कम्बरामयणस्य-अति संक्षिप्तं संस्कृतरूपम्।

इतिशम्।

प्रो० चौडूरि उपेन्द्र रावः
वरिष्ठाचार्यः,
संस्कृतप्राच्यविद्याध्ययनसंस्थानम्
जवाहरलाल नेहरू विश्वविद्यालयः
नवदिल्ली-११००६७

संक्षिप्त-कम्बरामायणकथारचयितुः

श्री गोपालन् महोदयस्य परिचयः

संक्षिप्त-कम्बरामायणकथायाः लेखकः श्री गोपालन् महोदयः 1940 तमे वर्षे दिसम्बर मासे तमिळनाडुराज्ये जनिमलभत। 1962 तमे वर्षे सः तत्रस्थ-अभियान्त्रिक-महाविद्यालयात् सिविल इन्जिनीरिंग आनर्स परीक्षामुत्तीर्णः। स पश्चात् पोर्ट एवं हार्बर इत्याख्ये इन्जिनीरिंगविभागे विशेषज्ञतां प्राप्नोत्। तदनु 1964 तमे वर्षे भारतसर्वकारस्य भूतलपरिवहनमन्त्रालये (GOI) कनिष्ठ-अधिकारी-रूपेण एषः महोदयः सम्मिलितः अभवत्। तथा च दिसम्बर 2000 तमे वर्षे भारतसर्वकारस्य विकास-साहाय्यकरूपेण सेवानिवृत्तः जातः। बंदर्गाहविषये एतत्सर्वोत्कृष्टं पदमासीत्। अभियान्त्रिकपदानन्तरं सर्वकाराय परामर्शदातृरूपेण एषः महोदयः कार्यमकरोत्। पश्चात् 2008 तमे वर्षे सः कोयम्बत्तूरुनगरं गत्वा तत्रैव सुखजीवनं यापयन्नस्ति।

तमिलकाव्यपठनलेखनयोः द्वयोः विषये तस्य नित्याभिरुचिः आसीत्। सः आत्मनः अत्यन्तप्रियस्य तमिळकवेः कम्बन्महोदयस्य

महतीं कृतिं रामायणमधीतवान्। तस्मिन् समये कम्बरामायणस्य परिमाणं चत्वारिंशत्सहस्राधिकपङ्क्तियुक्तमासीत्। रामायणेऽस्मिन् कविकृतं तत्कालीनं कठिनभाषाप्रयोगं दृष्ट्वा कम्बनस्य कथां प्रामाणिकरूपेण स्वीकृत्य सरलतमिळभाषायां संक्षेपेन रामायणलेखनाय प्रयासः कर्तव्यः इति गोपालन् महोदयः निश्चयं कृतवान् । कवेः कम्बनस्य कथा एवात्र प्रामाणिकरूपेण स्वीकृता। सः मई 2013 तमे वर्षे रामकथानामकं पुस्तकमेकं ८00 सरलतमिळभाषापद्येषु व्यरचयत्। सम्प्रति तस्य ग्रन्थस्य संस्कृतानुवादेन सह मुद्रणं कृत्वा तस्य मूल्यवर्धनं करणीयमिति प्रयासः क्रियते। तेन ग्रन्थस्य व्यापकप्रचारो भवेदिति आशा।

संस्कृतानुवादकार्यमेतत् जवाहरलाल नेहरू विश्वविद्यालयस्य वरिष्ठाचार्येण प्रो० चौडूरि उपेन्द्र राव महोदयेन सम्पादितम्। ग्रन्थोऽयं समस्तसंस्कृतविद्वन्मनांसि रञ्जयिष्यतीत्याशास्महे।

भवतु मङ्गलम्।

–प्रकाशकाः



ग्रन्थप्रकाशकस्य

श्री तनिकेल्ल विजयमूर्तिमहोदस्य परिचयः

आन्ध्रप्रदेशे लब्धजन्मानः श्री तनिकेल्ल विजयमूर्तिमहोदयाः आन्ध्रविश्वविद्यालयात् स्नातकपदवीं प्राप्य नेदरलैण्ड्देशात्समुद्रीयक्षेत्रे (marine sector) अग्रिमं प्रशिक्षणं प्राप्तवन्तः। नौकानिर्माणशास्त्रे अध्ययनं कृत्वा तस्मिन्नेव क्षेत्रे कृतभूरिपरिश्रमाः एते गुंटूर मण्डलान्तर्गतस्य रेपल्ले ग्रामस्य निवासिनः। तेषां पितृपादाः स्वर्गीय श्री जोगा राव महोदयाः सुप्रसिद्धशिक्षाविदः आसन्। विजयमूर्तिमहोदयाः 1970 तमे वर्षे कार्यहितार्थं नवदिल्लीनगरमागत्य, स्थायिरूपेण तत्रैव सम्प्रति निवसन्ति।

समुद्रीयविषयेषु विशेषज्ञतां प्राप्य श्री विजयमूर्तिमहोदयाः नौकानिर्माण-ड्रेजिंग-रिक्लेमेशन, नौकातटविकासादिकार्येषु व्यापकरूपेण कार्यं कृतवन्तः। एते विभिन्नवैश्विक-तकनीकी-समुद्री-उद्योग-विकास-कार्यक्रमेषु उद्योग-प्रतिनिधिमण्डलानां आध्यक्ष्यं कृत्वा तस्मिन्नेव क्षेत्रे सेवां कुर्वन्तस्सन्ति, विविधोद्योगसंस्थाभिः सह सक्रियरूपेण संलग्नाश्च सन्ति। महतः गौरवस्य विषयः यत् 2018 तमे वर्षे भारतीयनौकाश्रयाणां समुद्रीयक्षेत्रस्य च प्रवेशे योगदानाय

तेषां प्रयत्नस्य सत्कारार्थं नेदरलैण्ड्देशस्य राज्ञा महामहिमेन 'ऑफिसर इन द ऑर्डर आफ् ऑरेन्ज-नासाउ' (Officier in De Orde van Oranje-Nassau) इत्येतदुन्नत-डच-प्रौद्योगिकोत्पादकं पदं प्राप्तमेतैः। एतत्सम्मानं नेदरलैण्ड्-देशस्य महामहिमस्य राज्ञः पक्षतः नेदरलैण्ड्-देशस्य राजदूतेन महामहिम-मार्टेन्-वैन् डेन्-बर्ग्-महोदयेन विजयमूर्ति-महोदयेभ्यः प्रदत्तम्।

विजयमूर्तिमहोदयाः तिरुमल-तिरुपति-देवस्थानस्य समित्यै एकां व्यापकां आई० टी० कार्यप्रणालीं दत्तवन्तः, अपि च तां सक्रियरूपेण-उपयोक्तुं टी० टी० डी० इत्यस्याः संस्थायाः कृते लेखा एवं लेखापरीक्षा विभागैः स्व बजट डेस्केन सह एकीकरणं क्रियते तेषां आई० टी० कम्पनी वज्रा इन्फ्राटेक प्राइवेट् लिमिटेड् द्वारा।

स्वमातापित्रोः स्वर्गीय लक्ष्मी रुक्मिणी-जोगा रावयोः शिक्षानुरागाभिव्यक्त्यर्थं श्री विजयमूर्तिमहाभागाः चत्वारिंशद्वर्षेभ्यः अपेक्षितेभ्यश्छात्रेभ्यः छात्रवृत्तिं प्रयच्छन्तस्सन्ति। न केवलमेतत्, विजयमूर्तिमहाभागाः विशाखापत्तन-नगरे चिकित्सासुविधाभ्यः अपि साहाय्यं कुर्वन्तः समाजस्य विपन्नवर्गस्य निःशुल्कचिकित्सायाश्च व्यवस्थां कुर्वन्ति।

शिक्षाक्षेत्रे स्वयोगदानाय एतेभ्यः भारतसर्वकारेण मान्यता प्रदत्ता। जवाहर-नवोदय-विद्यालयानां समीक्षणसमितौ कार्यकारिणीसदस्य-रूपण एते नियुक्ताः। विजयमूर्तिमहाभागाः 2005 तः 2008 पर्यन्तं अस्मिन्पदे कार्यमकुर्वन्, तदनन्तरमेते स्वव्यक्तिगतरूपेण विद्याव्यवस्थायाः समर्थनं कुर्वन्तस्सन्ति।

श्री शृङ्गेरीशारदापीठस्य परमपूज्यानां जगद्गुरुशंकराचार्याणां श्री भारती तीर्थ महास्वामिनां आशीर्वादैः विजयमूर्तिमहोदयाः नवदिल्ल्याः

वसंतविहारस्थस्य श्रीशंकरविद्याकेन्द्रस्य प्रबंधसमित्या: सदस्यरूपेण सेवाभाग्यं प्राप्तवन्त:। स्वामिनां दिव्याशीर्वादैस्ते श्रीशंकरविद्याकेन्द्रे नवग्रहानां प्रदानञ्चाकुर्वन्।

श्रीवनमालीविष्णुसहस्रनामसंघस्य संस्थापकसदस्या: एते ।1996 तमे वर्षे स्वगृहे एव अत्यल्पसमूहेन आरब्ध: एष: संघ: अधुना प्रतिशनिवासरे साप्ताहिकै: कार्यक्रमै: दिल्यां शताधिकपरिवारेषु भक्तिप्रवर्तनं करोति। संघेऽस्मिन् आचार्य उपेन्द्र राव महोदया: अपि स्तोत्रपाठमकुर्वन्। तैरपि स्वगृहे श्रीवनमालीविष्णुसहस्रनाम-पारायणकार्यक्रमा: कृता:।

दक्षिणभारतनटीनटसमाख्याया: अध्यक्षरूपेण एते संगीतनाट्य-कलामाध्यमै: तेलुगु साहित्यसंस्कृत्यो: प्रचारमकुर्वन्। रामायणग्रन्थ-प्रकाशने महद्योगदानमकुर्वन्नेते। विजयमूर्ति तनिकेल्लमहोदया: नवदिल्लीत: बहुदूरे स्थितस्यान्ध्रप्रदेशस्य विषयेऽपि पर्याप्तरुचिं स्थापयन्ति। एतेषां धर्मपत्नी श्रीमती अन्नपूर्णा महाभागा अपि विविधधार्मिककार्यक्रमेषु बद्धादरा सती सर्वदा पुण्यप्रदेषु कार्येषु व्यग्रा भवति। सम्प्रति एतस्य रामायणग्रन्थस्य प्रकाशने श्री विजयमूर्ति महाभागानामद्वितीयं योगदानं विद्यते। सन्दर्भेऽस्मिन् एतेषां सहकुटुम्ब-आयुरारोग्याभयैश्वर्यप्रदानाय भगवान्श्री रामचन्द्रस्सम्प्रार्थ्यते। (एतेषां सङ्केत:— Soundarya", C – 6, Gulmohar Park, New Delhi – 110 049)

–प्रकाशका:

श्रीरामकथा

सङ्क्षिप्तसंस्कृतगद्योपनिबद्धा

संस्कृतानुवादकः

प्रो. चौडूरि उपेन्द्र रावः

वरिष्ठाचार्यः

जवाहरलाल नेहरू विश्वविद्यालयः

नवदिल्ली

श्रीमत्कम्बरामायणस्य

सङ्क्षिप्ततमिलमूललेखकः

श्री गोपालन् महोदयः

गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलचारुभक्षणम्।
उमासुतं शोकविनाशकारकं नमामि विघ्नेष्वरपादपङ्कजम्।।

सरस्वती नमस्तुभ्यं वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा।।

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः
गुरुस्साक्षात् परब्रह्म तस्मै श्री गुरवे नमः

श्री रामचंद्र कृपालु भज मन हरण भवभयदारुणम्।
नवकंजलोचन-कंजमुखकर-कंज-पद-कन्जारुणम्।।

बालकाण्डः

अथ बालकाण्डः

जगद्विख्यातस्य अयोध्याख्यस्य विश्रुतनगरस्य राजाऽसीत् पराक्रमसम्पन्नः दशरथः। यद्यपि दशरथः सर्वविधसम्पत्तियुक्तः आसीत्, तथापि अपत्याभावदैन्यपीडित आसीत्। तस्माद्दशरथेन कश्चन महायज्ञस्समनुष्ठितः। तस्य यज्ञस्य प्रभावेण स राजा स्व-तिसृभ्यः पत्नीभ्यः चतुरः पुत्रानवाप।

कौसल्यायाः प्रियपुत्ररूपेण श्रीमन्नारायणः पृथिव्याः उपरि अवततार। स एव जगत्प्रसिद्धः श्रीरामः इति निखिलेऽपि संसारे सुप्रसिद्धोऽभवत्। राज्ञी कैकेयी भरतं सुषुवे। तथैव राज्ञी सुमित्रा लक्ष्मण- शत्रुघ्नौ सुषुवे। यथा यथा ते पुत्राः प्रवृद्धास्तथातथा ते गुरोर्वशिष्ठात् युद्धादिकलाः प्रापुः। वेदवेदाङ्गनामपारं ज्ञानमप्यापुः।

तेषु दिनेषु विश्वामित्राख्यः कश्चन प्रसिद्धः ऋषिः आसीत्। तेन ऋषिणा एकं वैदिकयज्ञानुष्ठानं प्रकल्पितम्। विश्वामित्रेण प्रकल्पितं

वैदिकयज्ञानुष्ठानं विफलं कर्तुं राक्षसैर्महान् प्रयत्नः कृतः। एवं स्थिते विश्वामित्रः परमतेजस्विनं ऋषिं वसिष्ठं तत्संरक्षणाय कमप्युपाय-मयाचत। पश्चाद्विश्वामित्रस्यानुरोधेन रामलक्ष्मणौ यज्ञसंरक्षणाय विश्वामित्रेण सह प्रेषितौ राज्ञा दशरथेन।

रामलक्ष्मणाभ्यां स्वधनुर्बाणाः धृताः। धनुषि प्रत्यञ्चा समारोपिता। शक्तिशालिनी राक्षसी ताडका मारिता रामेण। यज्ञकार्यविध्वंसिनी सा मृता। तस्याः मरणं श्रुत्वा तत्रान्यराक्षसा अपि समवेता जाताः। पश्चात् उभाभ्यां भ्रातृभ्यां रामलक्ष्मणाभ्यामन्यराक्षसा अपि मारिताः। ऋषीणां वैदिकयज्ञानुष्ठानं निर्विघ्नं जातम्। तेन ऋषयस्सर्वेऽपि संतुष्टाः। कार्यसाफल्यानन्तरं ऋषिर्विश्वामित्रः तौ रामलक्ष्मणौ भ्रातरावानिनाय मिथिलानगरं प्रति। पश्चात्ते सौन्दर्यपूर्णां मिथिलानगरीं प्राप्नुवन्।

मिथिलागमनमार्गमध्ये परमपवित्रायाः अहल्यायाः कथा श्राविता विश्वामित्रेण। अहल्या प्रस्तरीभूता शापवशात् परन्तु स्व-पादाङ्गुष्ठेन प्रस्तरमूर्तिं स्पृशन् अहल्यायाः पुनर्जीवनप्रदानमकरोत् श्रीरामः।

तद्दृष्ट्वा सन्तुष्टेन ऋषिणा विश्वामित्रेण प्रोक्तं "हे रामभद्र! यस्मिन् दिने त्वं ताडकाममारयः तस्मिन् दिने एव मया तव बाह्वोरपरिमिता शक्तिर्दृष्टा। अपि च यस्मिन् दिने स्वपादसंस्पर्शेन त्वमहल्यामुज्जीवयः तस्मिन्दिने तव पादयोर्माहात्म्यमपि मया दृष्टम्।" एतादृशैरन्यैश्चानन्द-मयैर्वचनैस्ते मनोहरपुरीं मिथिलामाजग्मुः।

मिथिलां प्रविश्य एकस्मिन् दिने रामः राज्ञः जनकस्य पुष्पवनम-विशत्। तत्र तेन सौन्दर्यसम्पन्ना सरसिजनयना सीतादेवी दृष्टा। रामचन्द्रः प्रथमवारं सीतां तत्रैवापश्यत्। रामसीतयोर्नेत्रसंयोगस्सञ्जातः। निर्निमेषञ्च उभौ परस्परं पश्यन्तावास्तां बहुकालपर्यन्तम्। उभावपि अन्योन्यमनसी चोरयामासतुः।

मिथिलाधीशेन राज्ञा जनकेन स्वपुत्र्याः विवाहः चिकीर्षितः। परन्तु "यः प्रभोश्शिवस्य धनुर्भग्नं कर्तुं प्रभवेत्स एव मे पुत्र्याः पतिर्भवितुं योग्यो भवेदिति" तस्याभिसन्धिरासीत्।

तदा तत्र सम्प्राप्ताः सर्वेऽपि राजकुमाराः अत्यन्तशक्तिशालि-शिवधनुः प्रकम्पयितुमपि समर्थाः नैव जाताः। इत्थं ते सर्वेऽपि यदा पूर्णरूपेण विफलास्सञ्जाताः तदा कौसल्यानन्दनः लोकाभिरामः रामचन्द्रः महर्षिं विश्वामित्रं प्रणम्य, तस्मात् जयायाशीर्वादमवाप्य सिंहवत्स्थैर्येण सभामञ्चमारुरोह। तत्र च स्थितस्सन् मेरुपर्वत इव शुशुभे।

यदैव श्रीरामः त्रिनेत्रस्य महादेवस्य धनुरुत्थाप्य, प्रत्यञ्चाञ्च तस्मिन् बद्धुं प्रायतत, तदा महता शब्देन तद्धनुर्भग्नमभवत्, तत्शकलानि चाधःपतितान्यभूवन्। सर्वत्र 'जय जय' ध्वनिरुत्पन्ना। आनन्दतरङ्गाश्च परितो समनुव्याप्ताः। सीता प्रमुदिता जाता।

रामस्तदा अयोनिजया सीतया वृतः पुष्पमालालङ्करणेन। सा तु लक्ष्म्याः एव अवतारभूता। इत्थं मिथिलायां सीतारामयोर्विवाह-स्सुसम्पन्नो जातः।

तदा दशरथादयस्तत्र समागत्यान्येषां त्रयाणामिक्ष्वाकुराजपुत्राणां भरतादीनां विवाहं मिथिलायाः सुन्दरराजकुमारिभिस्सह सम्पादयामासुः। परिवारेण सह अयोध्यां गच्छता रामेण अयोध्यागमनवर्त्मनि परशुरामाख्यः तेजोमयः कश्चन ब्राह्मणः दृष्टः। महापराक्रमी परशुरामः स्वगुरोश्शिवस्य धनुर्भङ्गेनात्यन्तक्रुद्धो जातः।

"हे राम! तवास्मिन् कर्मणि किमस्ति वीर्यम्? किमस्ति च वैशिष्ट्यं? पुरातनमादावेव शिथिलीभूतं शिवधनुर्भग्नीकृतं त्वया"। इति परशुरामेणोच्चैर्गर्जितम्। परशुरामोऽपि भगवतः विष्णोः

अवतारस्वरूप एव। इत्थं प्रतिस्पर्धता पराक्रमिणा परशुरामेणोक्तं, "यदि त्वं बाहुबली भवेः, तर्हि मदधीने विद्यमानं नारायणस्य धनुः उत्थाप्यावनमयितुं प्रयतस्व" इति। रामेण तदपि धनुः लीलयैव भग्नीकृतं, स्मितेनोक्तं च "किमिदं पर्याप्तम्?" इति।

तेन कर्मणा प्रहृष्टेन परशुरामेण स्वतपोप्रभावेण लब्धां सर्वामपि शक्तिं रामाय समर्प्य मोदमवाप। धनोरुड्डीयमानैश्शरैः परशुरामस्य एषा शक्तिःधृता। पश्चाद्रामेण महासागराणामधिपतये देवाय वरुणाय तद्धनुर्दत्तम्। अत्यन्तसन्तोषेण सर्वेऽपि ते अयोध्यां जग्मुः।

इति बालकाण्डः

अयोध्याकाण्डः



अथ अयोध्याकाण्डः

रामस्यायोध्यानगरप्राप्त्यनन्तरं दशरथेन चिन्तितं यज्ज्येष्ठपुत्राय नयनाभिरामाय श्रीरामचन्द्राय राज्यसिंहासनं समर्पणीयमिति। परन्त्वनेन निर्णयेण कैकेयीदास्याः मन्थरायाः महद्दुःखमजायत। कुटिलमनसा सा बहुखेदं प्रदर्श्याऽपारं दुःखमनुभूतवती।

कैकेय्याः मनसि रामस्य कृते महान् स्नेहः आसीत्, प्रेमभावश्चासीत्। परन्तु कुटिला दासी मन्थरा राज्ञ्याः कैकेय्याः मनसि विषमपूरयत्। मन्थरायाः उपदेशेन कैकेयी महाराजस्य दशरथस्य वरद्वयमयाचत। एतत् वरद्वयं दशरथेन बहुपूर्वं दत्तमासीत्तस्यै। परन्तु तद्वरद्वयं तस्मिन्नवसरे, तत्क्षणादेव दातव्यमित्युवाच सा।

तत्र प्रथमवरः आसीत्, रामस्य चतुर्दशवर्षपर्यन्तं वनवासः, द्वितीयवरः आसीत् रामस्य स्थाने भरतस्य अयोध्यायाः राज्यसिंहासन-प्रदानम्।

एतद्वरद्वयमयाचत सा लोभविमूढा कैकेयी। एतद्वरद्वयं श्रुत्वा दशरथः दिग्भ्रमितो जातः। तस्य शरीरं प्रकम्पमानमासीत्। पश्चात्स राजा महता दुःखेन मूर्च्छितोऽभवत्। माता कौसल्या दुःखशराघातविद्धा जाता। राज्ये अन्ये सर्वेऽपि दुःखसागरे मग्नास्सञ्जाताः। परन्तु कैकेयी सफलीकृतमनोरथाऽतिप्रसन्ना जाता।

पितृवाक्यपरिपालनदक्षो रामः अयोध्यायाः राज्यसिंहासनं तत्याज। निरासक्तभावनया सहर्षं वनवासमङ्गीचकार श्रीरामः। मुनिवस्त्रधारणं कृत्वा, अतिप्रियेण लक्ष्मणेन, प्राणसदृशया सीतया च सह काननं गन्तुमुद्युक्तोऽभवत्।

राज्यस्य वरिष्ठमन्त्रिसमूहः, अन्ये चादरणीयाः गुरवः, मातरः, बान्धवाश्च रामस्यारण्यवासदृढदीक्षां रोद्धुं बहु प्रायतन्। परन्तु रामः स्वीकृतं निश्चयमन्यथाकर्तुं नाङ्गीचकार। तत्पश्चाद्रामः प्राणतुल्यं पितरं स्वमातरस्तिस्रः च परित्यज्य वनगमनाय सिद्धोऽभवत्। अयोध्यायाः सर्वेऽपि जनाः राममेवानुसरन्तो वनं प्रति प्रस्थिता अभवन्।

मार्गमध्ये ते सर्वेऽपि जनाः श्रान्तास्सन्तः यदा एकस्य वृक्षस्याधः व्यश्राम्यन्, तदा रात्रौ तेषु सर्वेषु प्रसुप्तेषु, रामादयस्त्रयः प्रकृतिसौन्दर्यमनुभवन्तः कानने प्रविविशुः। ते पश्चात् पवित्रायाः गङ्गानद्याः उत्तरतीरं प्रापुः। तत्र तु ऋषीणामाश्रमाः आसन्।

"पितृवचनापेक्षयाऽन्यत्किमपि महत्त्वपूर्णं नास्ती" ति सर्वदा चिन्तयन्नादर्शपुत्रः श्रीरामः वनं जगाम। परन्तु पुत्रवियोगेन राजा तु दशरथः विक्षिप्तहृदयो जातः। दशरथः रामवियोगमसहिष्णुस्सन् तीव्रवेदनया पुण्यलोकान्विवेश।

अत्र वने निवसन्तं रामं मिलितुं कश्चन निषादराजः आजगाम। स तु स्वसमूहेन सह तस्मिन् भयङ्करे कानने एव निवसति स्म।

निषादराजा स्वच्छमनसा मधु-मत्स्य-युक्तं भोजनं रामाय समर्पयत्। तस्य निषादस्य नाम गुहः। परममित्र इव व्यवहरन्तं तं रामः स्वभ्रातृरूपेण परिगणयामास। रामेणोक्तं- ''मित्र! त्वया सह वयमिदानीं पञ्चभ्रातरस्सम्पन्नाः'' इति।

पश्चाद्रामः गुहमपृच्छद्यत्-''इतः गङ्गायाः अपरं तटं जिगमिषवो वयं, तस्मात् भ्रातः गुह! एकां नावमानय, अस्मान् अपरं पारं च गमय!'' इति। गुहः प्रसन्नो भूत्वा महदानन्देन सर्वमिदमकरोत्। परन्तु रामं त्यक्तुं सः बहुदुःखितोऽभवत्। रामोऽपि तं प्रेम्णा समालिलिङ्ग। तेन तस्य वियोगदुःखं किञ्चिन्न्यूनीजातम्। ततस्ते त्रयः तस्मात्स्थाना-न्निरगच्छन्।

तत्र परिभ्रमन्तः यदा ते महर्षेः भारद्वाजस्याश्रमं प्रापुस्तदा महर्षिणा भारद्वाजेनात्यन्तसन्तोषेण तेषां स्वागतसत्कारादयो विहिताः। फलानि, वन्यमधु च भोजने प्रदत्तानि। ऋषिणा भारद्वाजेनोक्तं यत् चित्रकूटाख्यं स्थानं तेषां निवासार्थं सुयोग्यस्थानमिति। चित्रकूटः देवभूमिरिति परिगणनीयः। ऋषेर्भारद्वाजस्याशिषः प्राप्य रामादयस्त्रयः यमुनानद्या-स्तीरमापुः। तत्र लक्ष्मणः वंशीदण्डैरेकां नावं निर्मिमे। तस्यामुपविश्य त्रयः सीतारामलक्ष्मणाः महता प्रयत्नेन नद्याः दक्षिणतटं प्रापुः।

तस्मात्स्थानात् शनैश्शनैस्ते चित्रकुटं जग्मुः। चित्रकूटाख्यं तत् स्थानमतिरमणीयं प्रकृतिमात्रा प्रसूतमेकमतिमनोहरं स्थानमासीत्। तत्र गत्वा ते त्रयः अत्यन्तमानन्दमनुबभूवुः। चित्रकूटसौन्दर्यसागरे मग्नास्सन्तः सर्वमपि परिश्रमं विसस्मरुः। रात्र्याः आगमनात्पूर्वमेव संध्यासमये लक्ष्मणः पर्णकुटीमेकां निर्ममौ। सीतारामौ पर्णकुटीं प्रविश्य परमानन्दमनुबभूवतुः। तां कुटीमेव तौ स्वगृहममन्येताम्।

एतावत्पर्यन्तं भरतः विचित्ररूपेण घटितमेतद्वृत्तं किञ्चिदपि

नैवाजानात्, यतोहि भरतः तस्मिन् समये केकयराज्यमधिवसति स्म। परन्तु चारमाध्यमेन सन्देशः प्राप्तः यत् ''अयोध्यानगरं प्रति शीघ्रमेव प्रत्यागन्तव्यम्'' इति। स तु भ्रात्रा शत्रुघ्णेन सह सानन्दमयोध्यां प्रस्थितः। स्वकीयं कोसलराज्यं प्राप्यैव भरतेन परितः अनेकानि भयावहानि दृश्यानि प्रत्यक्षीकृतानि, तानि दृष्ट्वा भरतः किञ्चिदिव विचलितो जातः।

अयोध्यां प्रविश्य भरतः हृदयोद्वेजकानि विषादभरितानि दृश्यानि पश्यन् हतोत्साहस्सञ्जातः। भग्नहृदयेन तेन राजभवनं प्रविष्टम्। सर्वं वृत्तान्तं श्रवणगोचरमभूत्। अत्यन्तक्रोधावेशेन मातरं कैकेयीं नानाकठोरवचनैर्भर्त्सयामास भरतः। दशरथपुत्रः भरतः वस्तुतः विनम्रः। पूर्वं कदापि मातरमित्थं नैवावदत्। माता तु तस्य बहु-आदरास्पदा। परन्तु तस्मिन् दिने प्रज्वलिताङ्गारसदृशानि वचनानि तस्य मुखान्निसृतानि। मातरं कैकेयीं राक्षसीं पापिनीं वर्णयामास सः। ''तीक्ष्णेनानेन खड्गेन तव शिरच्छेदं करिष्यामि चेदपि कापि हानिर्न भवेत्''। इत्युक्त्वा घोषणामकरोत् यत्- अद्यैव कपटनाटकेन वनप्रेषितं रामं पुनरानयिष्याम्यहमयोध्याम् इति। काननं गत्वा ज्येष्ठभ्रातरं प्रार्थयिष्ये यत्- ''भ्रातः क्षमस्वास्मान्, प्रीत्या प्रतिनिवृत्तो भवाऽयोध्याम्'' इति।

झटित्येव भरतः गुरुणा वसिष्ठेन, मातृभिः, अमात्यसुमन्त्रेण च सह ससैन्यमयोध्यातः वनं प्रतस्थौ। तत्र गङ्गायाः उत्तरतटं यदा ते प्राविशन्, तदा गुहस्तानपश्यत् दूरतः। प्रागेव ज्ञातवृत्तान्तस्सः क्रोधावेशेनाचिन्तयत्- ''मन्ये सम्प्रति भरतः भ्रातरं वने चरन्तमपि मारयितुं प्रवृत्तः, अत एव सैन्यबलेनागच्छति'' इति। परन्तु भरतं शनैश्शनैस्समीपागतं धूलिधूसरितवदनशालिनं, हस्तद्वयनमस्कृतं उदासीनमुखच्छायं, विषादभावभरितं विचिन्तितं च संवीक्ष्य गुहस्य क्रोधः उपशान्तः, विचारोऽपि तस्य क्रमात्परिवर्तितः।

गुहः भरतान्तिकं गत्वा तं समीपतो दृष्ट्वा जज्ञौ, वस्तुतः भरतः विषादविषण्णवदन इति। गुहस्य हृदयं द्रवीभूतम्। एषः राम इव धीरः, एतस्य मनसि दुर्भावनाभिः स्थानं प्राप्तुं नैव शक्यते। वनवाससमाप्तिपर्यन्तं रामः स्वराज्याधिकारं, प्रभुत्वञ्च तत्याज। परन्तु रामस्यैतं कठोरनिर्णयमन्यथाकर्तुं भरतेन प्रयत्नः प्रारब्धः। दैवात् प्राप्तमिदं सिंहासनं पुनः कदापि तस्य नैवागमिष्यतीति जानन्नपि भरतः रामायैव राज्याधिकारसमर्पणाय प्रायतत। गुहेन चिन्तितं यत् एकसहस्त्ररामाः अपि भरतसादृश्यं नैव भजन्ते। भरतस्य तु महान् हि त्यागगुणः इति।

गुहः भरतमुदिश्यात्मपरिचयं ददौ। परस्परं तौ महता प्रेम्णा समालिलिङ्गतुः। परस्परं पादप्रणामञ्च चक्रतुः। परस्परं भूयो भूयः नमश्चक्रतुः, कुशलप्रश्नान् च पप्रच्छतुः। पश्चात् नद्याः अपरं तटं प्रापयास्मानिति भरतेन प्रार्थितो गुहः प्रापयामास गुहः नावा सर्वानपि तान्सत्वरमेव नद्याः अपरं तटं श्रद्धया, प्रेम्णा सुरक्षितरूपेण च।

विशालसैन्येन सह आगच्छन्तं भरतं दृष्ट्वा शेषनागस्य अवतारभूतो लक्ष्मणः नितरां क्रुद्धोऽभवत्। स्नेहं, दयाञ्च परित्यज्य जगदभिरामं श्रीराममरण्यातिथितिं कृत्वा सम्प्रति तत्रापि कानने कमप्यप-कारमाचरितुं भरतः ससैन्यमत्रैवागच्छति। यद्येवं, तर्हि भरतं ससैन्यं व्यापादयिष्यामीति कोपेन लक्ष्मणो जगर्ज। धनुर्बाणैर्युद्धार्थं संसिद्धोऽभवच्च।

परन्तु रामः क्रोधान्धं लक्ष्मणं प्रोवाच – ''लक्ष्मण, मद्भ्राता मानवोत्तमः भरतः मामितः अयोध्यां नेतुमेवात्र समागच्छति, मदुक्तं विश्वसिहि'' इति। तेन लक्ष्मणः शान्तोऽभवत्। भरतं दृष्ट्वा रामस्य मनः करुणया दुद्राव ।नेत्रयोरश्रुबिन्दुनिर्गमो जातः।विषादपूर्णमान-सस्य लक्ष्मणस्य च नेत्रयोरश्रुपातस्सञ्जातः।

मेरुनगधीरस्य पितुर्निधनं श्रुत्वैव रामः मूर्च्छितोऽभवत्, भूमौ च निपपात। किञ्चित्कालानन्तरं लब्धचेतनः वशीकृतेन्द्रियः गुरोर्वशिष्ठस्याज्ञया पितुरन्त्येष्ठिसंस्कारमरण्ये एव विदधौ। भरतस्तु प्रतिनिवर्तितुमयोध्यां रामं ययाचे। वारं वारं याचितोऽपि सत्यवाक्परिपालनादक्षः रामः प्रेम्णैव तमनुरोधं निराकृत्य भरतमयोध्यां गन्तुमाज्ञां ददौ। मात्रे कैकेय्यायै पित्रा प्रदत्तं वचनं स्मारयन्, पितृवाक्यपरिपालनमेव मम परमधर्मः इत्युवाच रामः। ममायोध्या प्रतिनिवृत्तिपर्यन्तं त्वयैव राज्ञा अयोध्यायाः राज्यभारः धर्तव्य इति भरतमुवाच श्रीरामः।

भारहृदयेन भरतेनोक्तं, ''यद्येवं, तर्हि, भवच्चरणधारणपुनीतं पादुकाद्वयं प्रदीयतां कृपया'' इति। ''अहं तत्पादुकाद्वयं शिरसि निधायाऽयोध्यां नेष्यामि। अयोध्यासिंहासनोपरि तदेव भवत्पादुकाद्वयं निक्षिप्य पूजयिष्यामि प्रतिदिनम्। एतत्पादुकाद्वयमेव भवत्प्रतिनिधि-र्भूत्वा शासिष्यत्ययोध्याम्। अहं केवलं भवत्प्रतिनिधिर्भूत्वा राज्यसंरक्षकमात्रो भविष्यामि। चतुर्दशवर्षानन्तरं भवतः वनवास-समापनानन्तरं यदि भवानेकं दिनमपि विलम्बिष्यते, तर्हि मम शरीरमग्नये समर्पयिष्यामि''। इत्यप्यवोचद्भरतः।

पश्चाद्रामस्य चरणपादुके शिरसि निधाय भरतः नन्दिग्रामं विवेश। परमवैराग्येन सन्यासी इव सर्वसङ्गपरित्यागी भूत्वा आदर्शभ्राता भरतः जीवनयात्रां प्रारेभे। रामपादुकाधिष्ठितम् अयोध्यासिंहासनं परिर-क्षन्सेवकवत् राज्यं परिपालयामास भरतः। इत्थं भरतादीन् सर्वान्संप्रेष्य, चित्रकूटान्निर्गत्य सीतालक्ष्मणाभ्यां सह रामः दक्षिणस्यां दिशि गन्तुमुद्युक्तोऽभवत्।

इत्ययोध्याकाण्डः

अरण्यकाण्डः

अथ अरण्यकाण्डः

अथ सीतारामलक्ष्मणास्त्रयः महर्षेरत्रेराश्रमं प्रापुः। तत्र ऋषिपत्नी अनसूया ऋषिरात्रेयश्च महता हर्षेण प्रेम्णा च तेषां स्वागतं, सम्मानादीनि च चक्रतुः। तस्मात्स्थानात्ते नानाखगमृगसमाकुलं रमणीयं सकलभूमण्डलालङ्कारभूतं दण्डकारण्यं प्रापुः। तत्र सत्वरमेव विराध-नामको राक्षसस्तानपश्यत्। स्वमायाजालेन सीतामातुरपकारं कर्तुमुद्युक्तोऽभूच्च। विराधः शक्तिशाली कश्चन राक्षसः आसीद्दण्ड-कारण्ये। तेन सह सुदीर्घं युद्धं प्रवृत्तम्। अन्ते रामशराघातैस्स राक्षसः मृतोऽभवत्। तेन देहावसानेन स राक्षसः पापविमुक्तो जातः। गतं स्वकीयं गान्धर्वरूपं पुनः प्राप्य सः पुनर्जीवितो जातः। स्वस्वरूप-सम्प्राप्तौ साहाय्याचरणात् रामलक्ष्मणाभ्यां मुहुर्मुहुर्धन्यवादान्वितीर्य स गन्धर्वः अदृश्यतां गतः।

तत्पश्चात् यथा यथा ते त्रयः दण्डकारण्यस्य प्राकृतिकं सौन्दर्यमनुभवन्तः अत्यन्तानन्देन अग्रेऽसरन्, तथा तथा तेषामानन्दः द्विगुणितोऽभवत्। दण्डकारण्यवासिनः बहून् मुनिपुङ्गवान् ते मिमेलुः। तैर्दृष्टं यत् तेषु मुनिषु बहवः राक्षसैः पीडिताः प्रताडिताश्चासन्। यतो हि दण्डकारण्यसञ्चारिणो राक्षसाः ऋषीणामाश्रमवासिनाञ्च वैदिककर्मानुष्ठानं नैव सेहिरे। विविधविघ्नैर्मुनीन् भयग्रस्तात् पलायनोन्मुखान् च ते चक्रुः।

तेषां प्रार्थनामङ्गीकृत्य रामः तेषां रक्षणकार्ये निरतोऽभवत्। रामशराघातभीत्या तेऽसुरा दिशि दिशि दधावुः। इत्थं दशवर्षाणि रामः सीतालक्ष्मणाभ्यां सह तेषां पुण्यात्मनां महर्षिणां मध्ये सुखजीवनं यापयामास। तत्पश्चात् मुनीनामाज्ञां शिरसि धारयन् रामः सीतालक्ष्मणाभ्यां सह अतिविशिष्टस्य मुनेरगस्त्यस्याश्रमं दिदृक्षुस्तस्मात्स्थानात् दक्षिणस्यां दिशि प्रस्थानमकरोत्।

अगस्त्यः अतिविशिष्टः कश्चन महर्षिः। सागरवत् विशालः, येन सर्वोऽपि समुद्रः एकचुलिकायां संस्थापितो पीतश्च सरलतया। पश्चादगस्त्यः तं बहिर्विसर्जयामास, येन मानवाः पुनर्जलं प्रापुः। अगस्त्यः इत्थं प्रकम्पमानविश्वं कारुण्येन ररक्ष। एकदा मेरुविन्ध्य-योर्मध्ये स्पर्धा जाता। तया स्पर्धया विन्ध्यपर्वतोऽपि मेरुपर्वतवत् स्वकायोन्नत्याऽत्युन्नतोऽभवत्। यदा विन्ध्यः अत्यन्तोन्नतोऽभवत् तदाऽयमगस्त्यमहर्षिः विन्ध्यमवनमय्य दक्षिणस्यान्दिशि प्रविशन्- ''यावदहं दक्षिणतः पुनरुत्तरं नागच्छेयं, तावद् त्वमवनत एव तिष्ठ'' इत्युक्त्वा पुनरुत्तरस्यां दिशि नैवाऽगच्छत्। तेन दिग्द्वयेऽपि सूर्यप्रकाशः प्रविष्टः। इत्थमगस्त्यस्य चरितमद्भुतम्। कपटव्यापारेण वन्ययात्रिणः भक्षन्तं वातापिनं भुक्त्वा सम्पूर्णरूपेण तमुदरे पपाचायं मुनिः। तेन

समग्रसाधुलोकः तं मुनिं बहुधा प्रशसंस। एतादृशैरेव विशिष्टैः कर्मभिरनेकैरगस्त्यः सर्वसन्नुतो बभूव।

रामागस्त्ययोर्मेलनं महत्वपूर्णमासीत्। रामस्य विनम्रगुणशालित्वं वीक्ष्य अगस्त्यः तस्मै बहुशक्तिशालिनं प्राचीनं भगवतो शिवस्य शरं प्रददौ। अनेनैकेनैव शरेण पुरा भगवान्नीलकण्ठः त्रिपुरासुरं जघान। भगवानगस्त्यः अमरशक्तिशालिनं कञ्चन खड्गमपि रामाय प्रददौ। एतानि आयुधानि प्राप्य रामस्य बलमधिकं जातम्। भविष्यज्ञेनागस्त्येन महर्षिणा बहुप्रसन्नतया एतान्यायुधानि समर्पितानि रामाय।

पश्चादगस्त्यस्य महामुनेराज्ञया श्रीरामः सीतालक्ष्मणाभ्यां सह अतिमनोहरां पञ्चवटीं प्राप। पञ्चवटी तु प्राकृतिकसौन्दर्येऽद्वितीयं वन्यस्थानमासीत्। तत्र महती गोदावरी नदी प्रवहति स्म। गोदावर्याः पुण्यप्रवाहैस्तत्स्थानं पवित्रीकृतमासीत्। गोदावर्यास्तीरे लक्ष्मणेन सुनिपुणं विनिर्मिते कस्मिंश्चित् पर्णकुटीरे सीतारामलक्ष्मणाः सुखमुवासुः।

इत्थं दिनेषु गच्छत्सु एकदा लङ्काधिपतेः रावणस्य अनुजा शूर्पणखानाम्नी भीकरा राक्षसी काचन तस्मिन् कानने प्राविशत्। सा भयङ्कराकृतिः मायाविनी काचन शक्तिशालिनी राक्षसी आसीत्। इतस्ततो भ्रमन्ती क्रमेण सा पञ्चवटीं प्रविष्टा, रामस्य पर्णशालाञ्च ददर्श। तस्यां पर्णशालायां विचरन्तं धीराकृतिमन्तं रामं वीक्ष्य रामसौन्दर्यसम्मोहिताऽभवत्सा। मायाविनी स्वभयङ्कराकृतिं त्यक्त्वा अतिसुन्दरकन्यायाः आकृतिं स्वीकृत्य सा तत्र प्रविवेश। कन्यारूपस्वीकरणानन्तरं समस्तपुरुषजनसम्मोहनाकृतिरासीत्तस्याः। दुश्चिन्तनेन शनैश्शनैः रामस्यान्तिकमाजगाम सा शूर्पणखा।

श्रेष्ठपुरुषस्य रामस्यान्तिकमागत्य शूर्पणखा यदनुचितरूपेणाचचार,

तद्दृष्ट्वा रामानुजः क्रुद्धोऽभवत्। तस्याः विशृङ्खलाचरणं वीक्ष्य लक्ष्मणः सोढुं नैव शशाक। यदा सा तस्य भद्रवचनानि धिक्ककार, तदा रामानुजः लक्ष्मणः क्रोधावेशेन तस्याः नासिकां कर्णद्वयञ्च चकर्त तीक्ष्णशराग्रेण।

शूर्पणखाऽत्यन्तावमानेन रुदन्ती ततो निर्गता, क्रमेण सा लङ्काञ्च प्राप। क्रन्दन्तीं भगिनीं वीक्ष्य तस्याः भ्रातरः खरदूषणत्रिशिराः अत्यन्तोद्विग्नाः बभूवुः। दयनीयां स्थितिं तस्याः असहमानास्ते राक्षसानां महत्या सेनया युद्धाय प्रातिष्ठन्। तदा तेषां प्रस्थानसमुद्भूतो ध्वनिः भूम्याकाशौ प्राकम्पयत्। ते खरदूषणत्रिशिराः वायुमार्गेण समागत्य हठादाक्रमन् रामलक्ष्मणौ। तदा वीरपुरुषः रामः स्वधनुर्बाणैरेकेनैव हस्तेन ताननाशयत्।

घटितमेतत्सर्वं वृत्तं श्रुत्वा रावणः परमक्रोधाविष्टोऽभवत्। तस्य भगिन्याः क्षतविक्षतवदनं वीक्ष्य रुदन्तीं शोकाकुलामुद्विग्नां च तां दृष्ट्वा दन्दह्यमानमनसा केनेदमकार्यमनुष्ठितमिति पप्रच्छ। सा सम्पूर्णमपि घटनाप्रपञ्चं वर्णयामास। "भ्रातः तौ द्वौ साधारणमनुष्यौ, तयोर्ज्येष्ठः रामः, कनिष्ठश्च लक्ष्मणः। इदमस्मभ्यमवमानकरम्" इत्युवाच। अपि च रावणस्य स्वभावेन सुपरिचितया तया पश्चाच्चातुर्येणान्यदप्युक्तं "न केवलमेतौ द्वौ, ताभ्यां सह काचनात्यन्तसौन्दर्यवती, जगदेकसुन्दरी लीलावती रमणी मया दृष्टा" इति। सीतायाः सौन्दर्यप्रशंसां श्रुत्वा रावणः अस्थिरहृदयोऽभवत्, कामेच्छया विचलितान्तःकरणश्चाभवत्। स्त्रीणां सौन्दर्यलीलापरिमलानि कं वा तेजस्विनं पुरुषं न सम्मोहयेयुः!

दशकण्ठस्य रावणस्य हृदयं यथा यथा रागाऽविष्टमजायत, तथा तथा तस्य क्रोधावेशोऽपि द्विगुणतां गतः। कामादेव हि क्रोधः उत्पद्यते। सीतापहरणमेव साम्प्रतिकं कार्यमिति स चिन्तयामास। सुदृढा योजनाऽपि संरचिता रावणेन। पश्चात् रावणः स्वमातुलं मारीचं

साहाय्यार्थमस्मिन् कर्मणि पप्रच्छ। मारीचः नैतदुचितमिति बोधयितुं प्रायतत। परन्तु रावणः मातुलं मारीचं बहुधाऽभायत्। तडकापुत्रः मारीचः अन्ते रावणस्य प्रार्थनामङ्गीकृत्य स्वर्णमृगवेषं स्वीचकार। स्वर्णमृगोऽयं सीतायाः आश्रमपदं प्रेषितः रावणेन।

आश्रमपरिसरेषु विचरन्तं स्वर्णमृगं दृष्ट्वा सीता विस्मिताऽभवत्। सुवर्णप्रकाशेन दीप्यमानमद्भुतगात्रं तं मृगं प्राप्तुं तस्याः मनोऽत्यन्तं लुलुभे। तं विचित्रमृगमानेतुं सा रामचन्द्रमभ्यर्थयत्। भवेदियं राक्षसमायाऽथवा कथं सुवर्णमृगो भवेल्लोके इति लक्ष्मणेन निवारितोऽपि रामस्तत्क्षणादेव तमनुदधाव सीतामनोरथं सफलीकर्तुम्।

मायामृगस्तु वायुवेगेन गभीरकाननान्तरेषु बहुदूरं प्रदधाव। इतस्ततो कूर्दन् मृगः सुलभत्वभ्रममुत्पादयन् राममाश्रमपदाद्बहुदूरं निनाय। अथ रामः स्वधनुषि बाणं सन्धाय मृगं तं प्रजहार। रामबाणः मृगशरीरे तत्क्षणमेव प्रविवेश। शराघातविद्धः मृगः मारीचरूपेण स्वीयं वास्तविकं रूपं स्वीकृत्य रामस्य गम्भीरं कण्ठध्वनिमनुकुर्वन् ''हे सीते! हे लक्ष्मण!'' इत्युच्चैराक्रन्दनं कुर्वन् भूमौ निपतात।

रामस्याक्रन्दनध्वनिं श्रुत्वा सीता रामरक्षणार्थं लक्ष्मणं प्रेषयामास। परन्तु तत्पूर्वं लक्ष्मणः सीतायै सम्भावितं राक्षसमायाजालं विशदीकर्तुं प्रायतत। परन्तु रामस्नेहानुरक्ता सा लक्ष्मणं कठोरवचनैर्निन्दितुमारेभे। सीतायाः कठोरवचनैर्भृशं दुःखितो लक्ष्मणः रामाण्वेषणाय सम्प्रति मया गन्तव्यमेवेति निश्चित्य, सीतायाः सुरक्षोपायं किञ्चित्कृत्वा रामान्वेषणाय निर्जगाम।

लक्ष्मणस्य विनिर्गमनसमनन्तरमेव रावणः वृद्ध-ऋषिवेशे सीतायाः आश्रमसमीपमाजगाम। भक्तिं श्रद्धाञ्चाभिनयन् सीतायाः पर्णकुटीरस्य सम्मुखे स्थित्वा अन्तरागन्तुमनुमतिमयाचत। धर्मपरायणा

सीता तमादरेणान्तराहूय अतिथिसत्कारमकरोत्। यद्यपि तत्क्षणे एव सीतां धृत्वा हर्तुं सुयोगस्सम्प्राप्तस्तथापि, चतुरः सः दशग्रीवः चतुर्मुखब्रह्मणः शापं स्मरन्, सीतामस्पृशन्नेव तां सम्पूर्णपर्णकुटीमेवोत्थाप्य स्वरथे संस्थाप्य च तां लङ्कानगरं निन्ये।

आकाशमार्गे गच्छन्तं रावणमपश्यत् जटायुः। मध्येमार्गं जटायुः बलिष्ठैः स्वपक्षैः रावणं प्रताडयन्, सीतायाः रक्षार्थं रावणेन युद्धं कर्तुमारेभे। तदा रावणः शम्बुवरप्रसादलब्धेन खड्गेन जटायोः पक्षद्वयं छित्वा अग्रेऽगच्छत्। जटायुरधः पपात। सीतां स्वपुष्पकविमानेन आकाशमार्गे लङ्कामनयद्रावणः। तत्र च तां राक्षसीनां मध्ये अशोकवने बन्धिनीं कृत्वा, स्वभवनं ययौ लङ्काधिपतिः।

रामाण्वेषणे पर्णकुटीरात् बहिर्गतः लक्ष्मणः अजानन्नेतद्घटितं वृत्तान्तं, रामं मिलित्वा हृष्टचित्तोऽभवत्। सन्तोषेण भ्रातरं समालिलिङ्ग। तदा सीतायाः एकाकित्वं स्मरन्तौ द्वौ सपद्येव पर्णकुटीरं प्राप्नुताम्। तत्र सीतामदृष्ट्वा प्रकम्पितचित्तौ समजायेताम्। समुद्विग्नौ तौ तीव्रमनोव्यथया उद्विग्नेन चित्तेन च रथमार्गमनुसरन्तौ सीतान्वेषण–तत्पराववर्तेताम्।

मार्गमध्ये रामः भूमौ निपतितं जटायुं वीक्ष्य समुद्विग्नो जातः। कर्तितात् पक्षद्वयात् रुधिरप्रवाहः निःसृतः। प्रेम्णा जटायुं समालिङ्ग्य कथमित्थं घटितमिति पप्रच्छ रामः। जटायुरपि दैवदुर्विपाकात् घटितं समग्रमपि वृत्तान्तं रामाय न्यवेदयत्। पश्चाददतिवेदनामसहमानः जटायुः तत्याजासून्। जटायुनिधनेनात्यन्तदुःखितः रामः तस्मै अश्रुपूरिताञ्जलिं समर्प्य, जटायोरन्तिमं संस्कारमाचचार। जटायुर्मे पितृतुल्य इत्यवोचत्।

तत्पश्चाद्रामलक्ष्मणौ कबन्धेनावरुद्धौ। सुदीर्घबाहुशालिनं कबन्धं दृष्ट्वा तस्य विशालबाहुद्वयं चिच्छेदतुः रामलक्ष्मणौ। दिव्यस्य

रामहस्तस्पर्शस्य माहात्म्येन कबन्धः स्वशापेन मुक्तो भूत्वा 'धनु' नामको गन्धर्वो भूत्वा रामं प्रणम्योवाच – ''इतो नातिदूरे सुग्रीवाख्यः वानरराजः विद्यते, तेन सह मैत्रीं कृत्वा तस्य साहाय्यं प्राप्नुहि'' इति। पश्चात्स धनुराख्यः गन्धर्वः अदृश्यतां गतः।

ततो ऋष्यमूकपर्वते सुग्रीवं मिमिलिषुणा रामेण मध्येमार्गं रामसमर्पितजीवना काचन शबरजात्याः महिला शबरी दृष्टा। रामं दृष्ट्वा साऽत्यन्तसन्तुष्टचित्ताऽभवत्। अपारकरुणया रामः तया भुक्त्वा परीक्षितानि फलानि प्रेम्णा चखाद। शबरी ऋष्यमूकपर्वतमार्गं समसूचयत्। ऋष्यमूकपर्वतगमनमार्गं श्रुत्वा शबरीतः रामः ततः प्रतस्थे। समग्रसंसारपथप्रदर्शकाय रामाय मार्गं निर्दिश्य शबरी कृतार्था जाता खलु! अनतिकाले सा भक्ताग्रेसरी शबरी स्वर्गलोकप्रस्थानमकरोत्।

इत्यरण्यकाण्डः।

किष्किन्धाकाण्डः



अथ किष्किन्धाकाण्डः

पद्भ्यामरण्यपथि चलन्तौ रामलक्ष्मणौ क्रमशः ऋष्यमूकपर्वतं प्रापतुः। तत्र वानरराजेन सुग्रीवेण सह तयोर्मेलनमभवत्। स्वभ्रात्रा एव महाबलशालिना वालिना भीतस्सन् सुग्रीवः ऋष्यमूकपर्वत गुहासूवास। हनुमतः साहाय्येनैव रामलक्ष्मणौ प्रापतां तत्स्थानम्।

रामहनुमतोर्मेलनमतिविशिष्टमासीत्। हनुमता सुग्रीवस्य कथा सविस्तरं श्राविता रामाय। स्वभ्रात्रा वालिना सुग्रीवाय प्रकल्पिता महती हानिः। सुग्रीवस्य राज्यं पत्नीञ्चाकृष्य वाली सुग्रीवाय मानसिकं दैन्यमुत्पादयामास। सुग्रीवस्य दयनीयां कथां श्रुत्वा रामः सुग्रीवेण सह मैत्रीमकरोत्।

आकाशात् पतितानि महिलायाः वस्त्रबद्धान्याभूषणानि पूर्वं सुग्रीवेण प्राप्तान्यासन्। तस्मिन् समये आकाशे वेगादुड्डीयमाने विमाने उच्चैराक्रन्दन्तीं काञ्चन महिलां ऋष्यमूकपर्वते स्थिताः केचिद्वानराः

ददृशु:। वस्त्रबद्धानि तान्याभरणानि सुग्रीव: रामाय प्रादर्शयत्। अहो! सा महिला सीता एवासीत्। दक्षिणदिशि आकाशमार्गे ऋष्यमूक-पर्वतोपरिभागात् रावण: विमानेन यात्रामकरोत् पुरा।

सीताया: तान्याभूषणानि दृष्ट्वा रामचन्द्र: नितरां व्याकुल-चित्तोऽभवत्। अत्यन्तदु:खितो सूर्यवंशपुत्र: राम: सूर्यपुत्रेण सुग्रीवेण समाश्वासित:। सर्वमिदं पश्यता कुशाग्रबुद्धिना हनुमता कश्चन प्रस्ताव: स्थापित:। आदौ वालीनिग्रहणं कर्तव्यं, यतो हि सकलमपि वानरसैन्यं सम्प्रति वालिन: अधीने एवास्तीति। सीतान्वेषणाय विशालस्य वानरसैन्यस्यात्यन्तावश्यकता भवेदिति।

परन्तु अमितपराक्रमशालिनं वालिनमेतौ मानवौ मारयितुं कथं प्रभवेयुरिति सुग्रीवस्य मनसि कश्चन सन्देह आसीत्। राम: सुग्रीवस्येदं सन्देहं ज्ञात्वा एकेनैव बाणेन सप्तशालवृक्षान् बिभिन्द। रामस्यैतां शक्तिं वीक्ष्य सुग्रीव: विश्वस्तोऽभवत्।

परन्तु अमितपराक्रमशालिनं वालिनं कथं मारयेयमिति सुग्रीवस्य संशय आसीत्। पुरा वालिना रावणोऽपि पराजित:। समग्रोऽपि संसार: रावणस्य नाम्नैव प्रकम्पितो भवति स्म। इन्द्रादयो सर्वेऽपि देवा: रावणेन पराजिता: अभूवन्। वालिन: पराक्रमविषयं श्रुत्वा रावण: तं हन्तुं बहुधा प्रायतत। अथैकदा सागरे सन्ध्यावन्दनसमये अर्घ्यप्रदाननिरतमेकाकिनं वालिनं दृष्ट्वा रावण: पृष्ठभागात् तस्योपरि हठादाक्रमणमकरोत्। यतोऽहि देवताप्रसादलब्धेन बलेन वालिन: साम्मुख्यमेव कर्तुं न शक्यते केनापि। इत्थं पृष्ठत: हठादागतमपि रावणं बली वाली स्वपुच्छेन बध्वा आकाशमार्गे अष्टसु दिक्ष्वपि तमितस्ततस्समाकर्षन्, क्षतगात्रं रुधिरशरीरिणञ्चाकरोत्। इदमासी-द्वालिनो बलम्।

पश्चादनुजस्य सुग्रीवस्य पत्नीमपहृत्य वानरराज्यस्य राजाऽभवत् वाली। सुग्रीव: निराशया जीवति। एवं स्थिते साम्प्रतमेतौ

द्वाविक्ष्वाकुवीरौ वीक्ष्य तस्य प्रसुप्ता आशा जागरिताऽभवत्। तस्मात् रामस्य साहाय्याचरणाय कृतनिश्चयोऽभवत्सुग्रीवः। रामोऽपि सर्वमिदं ज्ञात्वा सुग्रीवं पुनस्सिंहासनाधिष्ठितं कर्तुं निश्चिचाय। पश्चाद्रामस्य वचनमनुसरन् सुग्रीवः वालिनं युद्धाय समाह्वयन् जगर्ज। ततो संवृत्ते घोरयुद्धे रामबाणेन शक्तिमयेन वाली भूमौ निपपात।

भूमौ निपत्यापि बहुकालपर्यन्तं वाली रामेण सह बभाषे। ''कथं त्वं वीरो भूत्वापि युद्धनिरतं मां वृक्षच्छायायां निलीयमानस्सन् बाणेन प्राहरः?'' इति वाली राममपृच्छत्। पश्चात् वालिना स्वापराधः ज्ञातः। दण्डनमिदं साक्षान्नारायणावतारभूतेन रामेण प्रदत्तमिति ज्ञात्वा राममित्थं प्रार्थयामास– ''हे राम, एषोऽस्ति मे प्रियपुत्रः अङ्गदः। अस्य संरक्षणभारः तवैव'' इति। रामोऽपि स्वीयोत्तम–खड्गप्रदानेन अङ्गदं ररक्ष। नारायणस्मरणेन महाबली वाली दिवङ्गतः।

वाली सम्पूर्णमपि जीवनं आनन्देन, तृप्त्या, धृत्या च यापयामास। अन्तेऽपि मानसिकशान्त्या एव दिवङ्गतः। तदनन्तरकाले हनुमतः पर्यवेक्षणे निर्धारितकार्याण्याचरन्नङ्गदः पितुर्महाबलिनो वालिनः अन्त्येष्टिसंस्कारं सम्पादयामास।

श्रीरामः लक्ष्मणस्य साहाय्येन सुग्रीवं वानरराजं कृत्वा तन्मूर्ध्नि मुकुटारोपणमकरोत्शुभे मुहूर्ते। सुग्रीवः स्वपरिवारेण सह विजयोत्साह-पूर्णो भूत्वा विविधेषूत्सवेषु निमग्नो जातः। परन्तु पूर्वमेव रामेणोक्तं, उत्सवानामनन्तरं सीताण्वेषणं कर्तव्यमिति, अपि च ''वर्षाकालपर्यन्त-मानन्दोत्सवं विधाय वर्षाकालान्ते ससैन्यं सीतान्वेषणाय सिद्धो भवेः'' इत्युवाच रामः।

सुग्रीवः हनुमता, अङ्गदेन अन्यैश्च सह किष्किन्धायाः पर्वतशिखरेषु प्राविशत्। रामः तत्रैव स्थितेऽन्यस्मिन् गिरौ न्यवसत्। विजयोत्सहपूर्णस्सन्-भोगेषु न्यमज्जत् सुग्रीवः। महान् कालो व्यतीतः। रामः सीतावियोगे

प्रत्येकमपि दिनं दुःखेनैव यापयामास। सुग्रीवस्तु भोगविलासगत-चित्तस्सन् महता मोदेन कालं निनाय।

ईदृशं सुग्रीवाचरणं दृष्ट्वा रामः अत्यन्तदैन्यमवाप। एवमेव क्रमेण कालो यापितः सुग्रीवेण। समस्तविधभोगाननुभूयाऽपि, सम्प्रत्यपि सुग्रीवः भोगेष्वेव रतो भूत्वाऽस्मान् विसस्मारेति खिन्नमनस्को जातः रामः। भ्रातुरेवंविधं चिन्तासक्तवदनं वीक्ष्य लक्ष्मणः दुःखितो जातः। सुग्रीवस्यैतादृशमाचारणं दृष्ट्वा क्रोधाविष्टो जातः। पश्चाद्रामप्रेषितः लक्ष्मणः किं प्रवृत्तमिति ज्ञातुं किष्किन्धामनुविवेश।

लक्ष्मणः नितान्तक्रोधेन किष्किन्धां प्राप्य युद्धार्थं सुग्रीवमामन्त्रयामास। सुग्रीवस्य नेत्रे उन्मीलिते जाते, स्वमूर्खतायाः अनुभवो जातः। लक्ष्मणं प्रणम्य रामेण सह तत्क्षणमेव रामस्यान्तिकमागच्छत्सुग्रीवः, क्षमाञ्चायाचत। सुग्रीवस्य विनम्रतां दृष्ट्वा रामस्य हृदयपरिवर्तनं जातम्। स्मितपूर्वभाषिना रामेण सुग्रीवस्य वचनमङ्गीकृतम्।

सुग्रीवः तस्मिन्नेव क्षणे स्वसमस्तवानरसेनामाहूय रामकार्ये नियोजयामास। वानराणां विशालसेनां दृष्ट्वा रामः प्रसन्नो जातः। ततः सर्वे मिलित्वा सीतान्वेषणमार्गचिन्तने निमग्नाः जाताः। स्वसेनां चतुर्धा विभाजयामास सुग्रीवः, चतुर्षु च भागेषु सा प्रेषिता। बुद्धिमन्तं वायुपुत्रं हनुमन्तं, जाम्बवन्तं अङ्गदमन्यांश्च वीरान्दक्षिणदिशि प्रेषयामास। यतोहि रावणः सीतां दक्षिणदिश्येवानयदिति कानिचित् प्रमाणानि लब्धानि। अतस्तस्यां दिशि प्रमुखाः वीराः प्रेषिताः।

राज्ञस्सुग्रीवस्याज्ञां शिरसि निधाय वानरसेना असाधारणान्वेषणाय प्रस्थिता। नदीपर्वतदुर्गानतिक्रम्य वानरवीराः सीतान्वेषणमकुर्वन्। मानवेतिहासे एव एतदतिविस्तृतमन्वेषणकार्यमासीत्।

अन्ततो ते सर्वेऽपि महेन्द्रगिरौ एकत्रिताः जाताः। सर्वे ते श्रान्ताः, खिन्नाश्च जाताः। वानरराजेन सुग्रीवेन प्रदत्तः एकमासात्मकस्समयः

समाप्तः। हनुमता तत्रोच्चैरेकः प्रस्तावः स्थापितः। किं वयं रिक्तहस्तैर्गच्छाम? अथवा अत्रैव महेन्द्रगिरौ प्राणानाहुतीकरवाम? इति।

मेघगर्जनसदृशान्येतानि वचनानि श्रुतानि सन्निकटस्थवृक्षवासिना पक्षिराजेन सम्पातिना। सपद्येव सम्पातिना चर्चायां भागः स्वीकृतः। हनुमता उक्तं कथं तस्यानुजः जटायुः वीरत्वपूर्णमरणमवाप इति। एतत्सर्वं श्रुत्वा सम्पातिना स्वीया सुदीर्घा कथा श्राविता।

सम्पातिना उक्तं यत् ''पुरा दन्दह्यमानभीषणतेजोमयस्य सूर्यस्य समीपं गतस्य मम भ्रातुर्जटायोः शरीरं ज्वलतो सूर्यरश्मेस्संरक्षणार्थं यदैवाऽहं स्वपक्षाभ्यां तमाच्छादयं तदैव सहसा मम पक्षद्वयं सूर्यप्रतापेन दग्धं जातम्। तस्माद्दिनादुड्डयितुमक्षमस्सन्नत्रैव पर्वतकोटरे संस्थितः'' इति।

सर्वान् वानरानुद्दिश्य सम्पातिना उक्तं- ''हे वानराः मा चिन्तयत। भयनिवारकं रामनामं जपत'' इति। पश्चात्सर्वे वानराः रामनामसंकीर्तनं प्रारभन्। रामनामसंकीर्तनपुण्यप्रभावेण सम्पातेः विदग्धपक्षद्वयं पुनः प्रवर्धमानमभवत्। क्रमात् पक्षद्वयं स्वीयं सम्पूर्णमाकारं प्राप्नोत्। रावणः यदा सीतामाकाशमार्गेण लङ्कामनयत्तदा सम्पातिना तदृश्यं दृष्टमासीत्। तत्सर्वं वानरेभ्यो विनिवेद्य सम्पातिरकथयत् यत्- ''नूनं सीता लङ्कां प्रति नीता'' इति।

सम्पातिः लङ्कां गन्तुं शक्नोति स्म, परन्तु तेन चिन्तितं यत्- लङ्का मत्कृते असुरक्षिता, इदं तु स्थानं वानररक्षितं सत् सुरक्षितं- इति। इत्थं विचिन्तयन् लङ्कागमनाद् विरराम। सम्पातेः निर्णयं श्रुत्वा बुद्धिमान् ऋक्षराजा जाम्बवानचिन्तयत् यत्- सम्प्रति कार्यमेतद् कर्तुं केवलं हनुमानेव समर्थः इति। सर्वैः प्रशंसितः हनुमान् स्वशक्तिं स्मरन् पराक्रमी भूत्वा प्रवर्धितो जातः। शनैः शनैः हनुमतः रूपं प्रवृद्धम्। अन्ते सः महाकायो भूत्वा मेरुपर्वतस्योपरि स्थितोऽभवत्।

इति किष्किन्धाकाण्डः

सुन्दरकाण्डः

अथ सुन्दरकाण्डः

दक्षिणदिशि स्वमुखं कृत्वा हनुमान् नितान्तरूपेण दृढदीक्षया, एकाग्रमनसा च रामचन्द्रं स्मरन् लङ्कां लक्ष्यीकृत्य रामबाणवदाकाशे चुकूर्दे। तस्य पदाघातेन पर्वतशिला भग्ना जाता। समुद्रोपरिमार्गे तेन विभिन्नविपत्तयः सम्मुखीकृताः। तथापि सर्वास्ताः विपत्तयः स्वीयेन बुद्धिबलेन तृणीकृत्य लङ्कासमीपस्थिते मैनाकपर्वतेऽवततार हनुमान्। ततोऽतिसुन्दरं प्रकाशमानं लङ्कानगरं दृष्ट्वा परं विस्मयमाप।

रात्रौ सर्वत्रान्धकारः यदा परिव्याप्तः, तदा हनुमान् नगरप्राकारेषु कूर्दन् लङ्कानगरं विवेश। तत्र लङ्किन्या समागमः जातः। तस्याः पराजयानन्तरमतिनिपुणतया हनुमान् विवेश लङ्कानगरं क्रूरराक्षस-संरक्षितम्।

तत्र सर्वेषु भवनेषु सीतामन्विष्य कुत्रापि तां नैव ददर्श। किं मया सीतामातुर्दर्शनं करिष्यतेऽथवा न? इति हनुमान् बहुचिन्तितो जातः। भारचित्तेन हनुमता पार्श्वस्थं अशोकोपवनं प्रविष्टम्। तत् बहुसुन्दरमुद्यानवनमासीत्। तत्रापि रामभक्तः हनुमान् सीतान्वेषणमेव व्यदधात्।

अन्ते हनुमता सीतामाता दृष्टा एव। अशोकवाटिकायां राक्षसीनां मध्ये सीता चिन्ताग्रस्ताऽसीत्। कृष्णवर्णरूपिणीनां राक्षसीनां मध्ये

चन्द्रकला इव सीतामाता दृष्टा। सा शुष्कक्षेत्रवदजायत। प्रतिपदि पाठशीलस्य छात्रस्य विद्या यथा कृशा भवति, तथैव सीतामाता कृशा बभूव। सा दु:खसागरमग्ना प्रकाशविरहिता दीपशिखा इव ददृशे। तस्या: मुखात् स्मितमदृश्यतां गतम्। निराशा-दौर्बल्याभ्यां सा चिन्ताग्रस्ता सती शुष्कलतेव ददृशे।

स्थिति: विकटा, कष्टकरी चासीत्, तथाप्येक: परमसौभाग्यस्य विषय: आसीत्-क्रूरराक्षसीनामपि मध्ये त्रिजटाख्या काचन राक्षसी मित्रवत् व्यवहरति स्म सीतया। एकदा सीता त्रिजटामुवाच- तस्या: वामभुज: प्रकम्पत इति। वामचक्षुरपि विचलितमिति। तदा त्रिजटया उक्तं- एतत्सर्वं शुभसूचकमिति। त्रिजटयाऽपि दु:खप्रदा: स्वप्ना: दृष्टा:। एतादृशा: स्वप्ना: लङ्काया: निनाशसूचका: इति सा सीतामूचे।

तस्मिन्नुद्याने एकस्य विशालवृक्षस्य शाखासु निलीन: हनुमानेतत् सर्वं ददर्श। घातकीनां राक्षसीनां मध्ये बद्धा काचन लतेव भासते स्म सीता। सीतामातु: एतादृशीं दयनीयां दशां दृष्ट्वा हनुमानतिदु:खितो जात:।

अथैतदाभ्यन्तरे तत्र दशकण्ठ: रावण: समुपागच्छत्। राक्षसीनां मध्ये चलन् पर्वत इव स: बभासे। भयङ्कराकृतिस्स दैत्य: सीतामुपेत्य विकटरूपेण जहास। तदा भीता सती सीता हरिणीव दृष्टा। परन्तु सीता आन्तरिकबलोपेता। रावणं धि:कुर्वन् सा अवनतमुखी भूत्वा अध: ग्रासाङ्कुरे बद्धदृष्टिर्बभूव। रावण: अहङ्कारप्रताडितो भूत्वा तां कठोरशब्दैस्ततर्ज। ''रामचिन्तां त्यक्त्वा मामेव वृणीष्व'' इति जगर्ज। तस्यादेशपालनाय मासद्वयात्मकं समयं दत्वा स ततो प्रतिनिवृत्त:।

स्वीयामेतादृशीं दयनीयां दशां वीक्ष्य सा दु:खितमनसा स्वयमेवात्मानं हन्तुमुद्युक्ताऽभवत्। तदा रामभक्त: पराक्रमी वीरहनुमान् तस्या: पुरत: प्रकटितोऽभवत्। ''अहं रामभक्त: हनुमानस्मि'' इति

सिंहवत् गम्भीरेण स्वरेणावदत्। पश्चाज्जानुभ्यां भूमावुपविश्य श्रीरामदत्तमङ्गुलीयकं सीतायै प्रददौ। सीता हृष्टा भूत्वा तमङ्गुलीयकं नेत्राभ्यां पस्पर्श। राम एवात्रागत इव सा नितरां रोमाञ्चिता जाता।

हनुमन्तं दृष्ट्वा सीता संतुष्टाऽभवत् कार्तज्ञ्यताञ्च प्रादर्शयत्। हे हनुमान्, त्वं मत्पितृतुल्यः, मातृतुल्यः, पुण्यात्मा, मज्जीवनसन्धाता, निर्माता च। एतदर्थं किमहं दातुं प्रभवामि? अहं त्वां चिरकाल-पर्यन्तमायुरारोग्यादि प्रदायकमाशीर्वादं तु दातुं शक्नोमि। आजीवनं तव ऋणी भविष्यामि।

प्रहृष्टेन हनुमता प्रोक्तं "मातः आगच्छ अहं भवतीं मम भुजस्क-धयोरुपावेश्य रामचन्द्रं प्रापयिष्याम्यधुनैव" इति। तत्-श्रुत्वा यद्यपि सीताऽतिप्रसन्नाऽभवत्, परन्तु परन्तु इत्थमूचे- "भवतः कार्यमिदं प्रशस्तं, तथापि शक्तिशालिनः परमवीरस्य रामस्य क्रोधग्नावेषः दैत्यः यावद्भस्मीभूतो न भविष्यति, तावदहं नैव तृप्ता भवेयम्। तद्गच्छतु, रामं च विनिवेदयतु यत् अहमत्र लङ्कायां तत्प्रतीक्षया जीवामीति।

पश्चात्सीता स्वीयं रत्नखचितं चूडामणिमभिज्ञानार्थं प्रदाय "प्रयच्छैनं रामाय जगदेकवीराय" इत्युवाच हनुमन्तम्। मणिं स्वीकृत्य तं नेत्राभ्यां भक्त्या संस्पर्श्य च महाबली हनुमान् ततः प्रतस्थे।

चूडामणिं स्वीकृत्य हनुमान् झटिति प्रतिनिवृत्तो न जातः। रावणविध्वंस एव वस्तुतः हनुमताऽभीष्टं कार्यमासीत्। तथा कर्तुं समर्थस्सन्नपि प्रभोराज्ञाभावेन तत् कार्यं कर्तुं न पारयामास हनुमान्। परन्तु कामरूपी सः विशालमाकारं प्राप्य अशोकवनस्य विध्वंसनं प्रारेभे। समाचारोऽयं रावणपर्यन्तं गतः। रावणः हनुमतः बन्धनार्थं शम्बुमालिनं, अक्षयकुमारं अपि च पञ्चान्यान् सैन्याध्यक्षान् प्रेषयामास। "गच्छत दुष्टवानरं बन्धीकृत्य समानयत" इत्युवाच सः। तेषां साम्मुख्यं एकेनैव हनुमता कृतम्। भीषणसंग्रामे तान्सर्वानप्यनाशयत्कपिश्रेष्ठः।

पश्चात् मेघनाथः स्वयं रथारुढस्सन् हनुमतः निग्रहार्थं प्रस्थितः। प्रवृत्ते युद्धे मेघनाथः ब्रह्मास्त्रप्रयोगमकरोत्। हनुमान् सर्वदेवताप्रसादलब्धबलेन अजेयः। तथापि ब्रह्मास्त्रस्य सम्मानार्थं स्वयमेव बद्धोऽभवत्। बध्वा रज्जुभिः हनुमन्तं नगरवीथीभ्यः समाकृष्य समाकृष्य, तं रावणसभामानिनाय मेघनाथः।

क्रोधावेशेन रावणः आत्मनः परिचयप्रदानाय हनुमन्तमादिशत्। हनुमानूचे यत् ''अयोध्याधीशस्य दशरथस्य पुत्रः रामः, अहं तस्य सेवकः'' इति। पश्चात् हनुमान्रावणमुपदिदेश यत्- ''रामलक्ष्मणयोरनुपस्थितिसमये एकाकिनीं सीतां बहुनिपुणतया त्वं यदत्रानीयास्थापयः, तन्नोचितमाचरितं सर्वथा त्वया। तदिदं वच्मि! हे राक्षसाधिप! सत्वरमेव त्वं सीतां रामाय समर्पय। तेन न केवलं तव क्षेमो भवेदपितु समग्रराक्षसकुलस्यापि क्षेमः अनेनैव कर्मणा भविष्यति'' इति।

हनुमतः एतादृशमुपदेशं श्रुत्वा दशकण्ठः रावणः इतोऽपि प्रकुपितोऽभवत्, उक्तमेव,

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये'' इति।

पश्चादत्यन्त-क्रोधावेशेन ''धृत्वा मारयत वानराधममेनम्'' इत्यादिदेश रावणः। तदा रावणस्य भ्राता विभीषणः उत्थायावोचत्- ''हे भ्रातः दूतहननं शास्त्रसम्मतं न भवति। नायं शिष्टाचारः। अनेन कर्मणा भवतः अपकीर्तिः भविष्यति'' इति। तत् श्रुत्वा रावणः ''तर्हि वानराणां पुच्छं प्रियतरं भवति। तदस्य पुच्छं ज्वालयत'' इत्यादिदेश। हनुमतः शरीरं ब्रह्मास्त्रप्रयोगमहिम्ना दृढनागपाशेन बद्धमासीत्। राक्षसाः नागपाशं शिथिलीकृत्य हनुमतः पुच्छाग्रं रज्जुभिर्बद्ध्वा तमज्वालयन्। पुच्छमग्नौ जज्वाल।

सीतायाः शुभ-मङ्गल-कामनया धर्मचारिणः वानरश्रेष्ठस्य पुच्छमग्नौ ज्वलितमपि शीतलमेवासीत्। तदा शठे शाठ्यं समाचरेदिति

न्यायमनुसरन् पुच्छं परिवर्त्य हनुमान् सीताधिष्ठितं स्थानं त्यक्त्वा सकलामपि लङ्कापुरीं ददाह। कार्यसमाप्त्यनन्तरं सीतामुपागत्य, तां पुनः प्रणम्य वायुमार्गेण शीघ्रमेव महेन्द्रपर्वतमाजगाम हनुमान्। तत्रान्ये वानराः हनुमतः प्रतीक्षां कुर्वन्त आसन्।

श्रीरामचन्द्रोऽपि तत्रैव सन्निषिन्न आसीत्। हनुमान् रामपार्श्वं दधाव। ''दृष्टा हि मया माता सीता'' इत्यानन्देनावोचत्। रामस्य हृदयं हर्षोत्फुल्लितं जातम्। ''हनुमान्! त्वदन्यमुन्नतं सुहृद्वरं नाहमैक्षे''। इत्युवाच हर्षातिरेकेण रामः।

मात्रा सीतया प्रदत्तं चूडामणिं रामाय समर्प्य तत्रैव निषिण्णोऽभवत् हनुमान्। सीतायाः केशालङ्कारभूतं चूडामणिं वीक्ष्य रामः आत्मानं विस्मृत्य आनन्दसागरे ममज्ज। तस्मिन्नानन्दसागरे सीतां विना नान्यदैक्षत रामचन्द्रः।

पश्चात् लङ्कायां सीता कीदृशं जीवनं यापयतीति सविस्तरं श्रावयामास हनुमान् रामम्। तस्याः दयनीयां स्थितिं हृदयविदारकां वर्णयामास कपीश्वरः रुदन्। यदि वयं मासाभ्यन्तरे तां न विमोचयेम तर्हि सा जीविता न भवेत् कदाचिदिति वदन्तं हनुमन्तं रामः निर्निमेशमपश्यत् गभीरेण मुखमण्डलेन।

एवं स्थिते सुग्रीवः सप्ततिप्रतिशतां सेनां दक्षिणस्यामेव दिशि न्ययोजयत्। चतुर्विंशति दिनेषु सर्वेऽपि वानरवीराः कठिनपर्वतमार्गेषूत्पतन्तः समुद्रतीरमाजग्मुः।

इति सुन्दरकाण्डः





युद्धकाण्डः

अथ युद्धकाण्डः

महासागरस्य दक्षिणकूले निवसतो रामस्य मनसि विचारतरङ्गा-स्समुद्भूताः। तेषु च रामः सम्पूर्णरूपेण निममज्ज । कथं वा समुद्रोऽयं तरणीयः? कथं वा सेना समुद्रयात्रां करिष्यति? को वा मार्गस्सम्प्रति! इति चिन्तयन्नासीत् रामचन्द्रः। लङ्कायां रावणः मुख्यामात्यैः बन्धुमित्रैस्सह भविष्ययोजनानां विषये परामर्शानकरोत्।

सर्वेऽपि अमात्याः राक्षसवीराश्च प्रोचुः यत् रावणः रामेण सह युध्येत, तस्य विनाशमपि कुर्यादिति। परन्तु केवलं धर्मवीरः विभीषणः युद्धमनुचितमिति जगाद। "सकलसमस्यानां हेतुभूता सीता सत्वरमेव रामाय समर्पणीया रावणेन" इति च उपदिदेश। विभीषणस्य वचः श्रुत्वा रावणः तमुपदेशं सर्वथा नाङ्गीचकार। विभीषणश्च

कठोरवचनैस्ततर्ज रावणः। ''कथं शत्रुपक्षं स्वीकृत्य राजद्रोहमाचरति भवानद्य?'' इति तं निनिन्द।

रावणस्य मूर्खतां पश्यन्विभीषणः चिन्ताभारयुतेन मनसा लङ्कां त्यक्त्वा समुद्रस्यापरस्मिन् तटे प्रविवेश। विभीषणः समुद्रस्य अपरं तटं प्राप्य वानरसेनामध्ये उपविष्टं श्रीरामचन्द्रमपश्यत्। रावणेन परित्यक्तः सः रामस्य शरणं ययाचे। सर्वेऽपि विभीषणस्य याचनाप्रस्तावं नाङ्गीकुर्वन् ''कथमयं जनः विश्वसनीयः'' इति। केवलं बुद्धिशालिना हनुमता तु सः प्रस्तावः स्वीकृतः, यतोहि हनुमान् लङ्कायां विभीषणस्याप्यावासमगच्छत्। तत्र तस्य भगवद्भक्तिस्साक्षादेव दृष्टा तेन। अन्येभ्योऽपि तस्य धार्मिकी प्रवृत्तिस्संश्रुता वायुपुत्रेण। तत्सर्वं हनुमान् तस्मिन् समयेऽकथयत्। हनुमतः वचनं श्रुत्वा रामः विभीषणस्य स्वभावेन प्रभावितोऽभवत्। सम्पूर्णमनसा विभीषणं स्वपक्षे समागन्तुमङ्गीचकार।

रामस्तत्क्षणे एव विभीषणाय लङ्काधिपत्यप्रदानार्थं लक्ष्मणं निर्दिदेश। लक्ष्मणः कार्यमेतत्सम्पादयामास। परन्तु विभीषणः मुकुलितहस्ताभ्यां भरतवत् श्रीरामचरणपादुकाद्वयं स्वीकृत्य स्वशिरसि संस्थापयामास।

पश्चाद्विभीषणः लङ्कापुरस्य प्रधानविषयान् सर्वानपि रामायान्ये-भ्यश्च सविस्तरमकथयत्। लङ्का समुद्रमध्यगता, सैन्यशक्तियुता, उत्कृष्टसैनिकास्तत्र सर्वदा लङ्कापुरस्य रक्षणे नियुक्ताः। पुरस्यास्य राजा इन्द्रादीनां विजेता बाहुबली रावणः। स शिवभक्ताग्रगण्यः। सकलशास्त्रवेत्ता पराक्रमी च।

वरुणदेवेनोक्तं यत्- गभीरसमुद्रतरणार्थं प्रस्तरखण्डैः एका वारिधिः निर्मेया इति। तत्-श्रुत्वा वानरराजा सुग्रीवः वास्तुशास्त्रवेत्तारं

नलं समाहूय वारिधिनिर्माणकार्यं सर्वं तस्मै समर्पयामास। सर्वे वानरवीराः पर्वतेभ्यः बृहदाकारकान् प्रस्तरखण्डानानीय समुद्रे पातयामासुः। सिकताञ्च सेतुनिर्माणस्थाने पातयाञ्चक्रुः। बहूनां बहुदिनपरिश्रमेण लङ्कागमनाय काचन वारिधिः निर्मिताऽभवत् सागरे। शतयोजनानां विस्तारेण दशयोजनानामौन्नत्येन च एषा वारिधिर्निर्मिता जाता। वस्तुतः सेतुरयं दिनत्रये एव निर्मितोऽभवत्।

सर्वे वानरवीराः, रामलक्ष्मणादयस्सर्वे प्रमुखाः महान्तमानन्द-मन्वभवन्। पश्चात्ते रामप्रमुखास्सर्वे वीराः वानरसेनया सह वारिधेरुपरि लङ्कागमनाय युद्धयात्रां समारभन्त, लङ्काञ्च ते प्रापुः। तत्र लङ्कातटं प्राप्य लङ्कां ददृशुः।

अपरत्र क्रूरराक्षसान् सर्वानाहूय युद्धयोजना समारब्धा रावणेन। परन्तु रामचन्द्रः शान्तियुतपरिष्काराय अङ्गदं दूतरूपेण रावणसभां प्रैषयत्। रावणः अङ्गदस्य शान्तिवचनानि धिःकुर्वन् तस्य दण्डनाया-मात्यानादिदेश। कथञ्चिदङ्गदः ततः प्रतिनिवृत्तः। आगत्य राममूचे यत्- साम्प्रतं युद्धमेव करणीयमिति, यतोहि रावणः शान्तिं नेच्छति। परमाहङ्कारपूर्णः सः युद्धमेवेच्छतीति।

अनेन प्रकारेण धर्माधर्ममीमांसा, रामरावणयोः युद्धं, वानरराक्ष-सानाञ्च युद्धं इत्यादयो विषयाः रामावतारस्य प्रधानहेतुभूताः। यदर्थं भगवान् विष्णुः रामावतारं स्वीकृत्य भुवि-अवातरत् सः समयः समागतः। साम्प्रतमेतत् सर्वमपि घटनाचक्रं प्रारब्धम्।

आदौ वानरसेना लङ्कां तु प्राप्ता परन्तु लङ्का प्रोन्नतैः प्राकारैः परिवृता, तैस्सुरक्षिता च। तेषाञ्च प्राकाराणां बहिर्भागे परिखाः आसन्। तासु च भयङ्कराकाराः मकराः भ्रमन्ति। परन्तु वानरवीराः तासु परिखासु प्रस्तरखण्डान् वृक्षान् च पातयामासुः। तेन परिखाः प्रपूरिताः। पश्चात् तत्र ते सर्वे चुकूर्दिरे। तेन तत्र भूमिः समतला जाता। पश्चात्प्राकारेष्वारुह्य

वानरवीराः राक्षसवीराणामुपरि प्रस्तरान्, वृक्षांश्चाक्षिपन्। तेन राक्षसास्सर्वेऽपि प्राणभयेन इतस्ततो प्रदधावुः।

तत्पश्चान्महद्युद्धं प्रवृत्तम्। श्रेष्ठवानरवीराः हताः। प्रमुखराक्षसाः प्रायस्सर्वेऽपि हता इति श्रुत्वा शक्तिशाली रावणः एक एव युद्धाय प्रस्थातुं निश्चिचाय। रामः स्वयमेव रावणेन योद्धुं युद्धक्षेत्रे स्थितोऽ-भवत्। परन्तु अत्युन्नतं रावणं द्रष्टुं कष्टमनुबभूव रामः। तदा हनुमान् झटित्येव रामं स्वभुजस्कन्धयोरारोप्य रावणस्य सम्मुखे संस्थापयामास। तदा रामरावणयोर्मध्ये भीकरं युद्धं प्रवृत्तम्।

रावणः युद्धनिपुणः। पराक्रमिणो रावणस्य, युद्धवीरस्य च रामस्य बाणैः समग्रोऽपि युद्धक्षेत्रस्याऽकाशः संछिन्नोऽभवत्। युद्धभूमिः राक्षसानां, वानराणां गजानाञ्च शताधिकैः शवैः समाच्छादिता जाता। तत् भयानकं दृश्यमासीत्।

क्रमेण धैर्यशालिनो रामस्य पराक्रमेण राक्षसवीराः परास्ताः अभवन्। महाबलिनो रावणस्य रथचक्रे त्रोटिते। तस्य धनुश्च विखण्डितमभवत्। पश्चात् रथस्थं श्वेतछत्रं, वीणाध्वजः इत्यादयः सर्वेऽपि राजशक्तिसूचकाः भग्नीकृताः। रामशराघातेन रावणस्य मुकुटमपि उत्क्षिप्तमाकाशे।

सहसा युद्धक्षेत्रमागतः रावणः सहसैव परास्तः जातः। वानरसेनया च राक्षसवीराः पराजिता अभवन्। सर्वे ते पलायिताः। रावणः भग्नशस्त्रः सन् एक एव रणक्षेत्रे स्थितोऽभवत्। रामः रावणं वीक्ष्य दयया इत्थमूचे- "हे रावण, अद्य प्रतिनिवृत्तो भव! आगच्छ पुनरपि श्वः विनूत्नैरायुधैः" इति।

अवनतमुखः भग्नहृदयश्च दशकण्ठः पुनस्स्वस्थानमगमत्। शिवलिङ्गस्य पुरतः उपविश्य स्वदुर्दशां पुनः पुनः स्मरन् शिवे ध्यानमग्नो

बभूव। तदेकध्यानेन शिवाराधनमकरोत्। तेन पुनः लब्धमात्मस्थैर्यं रावणेन।

तदा रावणः प्रसुप्तं कुम्भकर्णं सस्मार। कुम्भकर्णः महाबली। युद्धे तस्य साम्मुख्यं न कोऽपि कर्तुं प्रभवति। रावणः स्वसेवकानाहूय निद्रितं कुम्भकर्णं प्रबोधयितुमादिदेश। महता कष्टेन ते कुम्भकर्णस्य निद्राभङ्गं कर्तुं समर्था अभवन्। कुम्भकर्णः रावणस्याग्रे समुपस्थितः। रावणः प्रवृत्तं वृत्तान्तं सर्वं श्रावयित्वा रामलक्ष्मणयोः हननार्थं कुम्भकर्णं प्रचोदयामास।

सर्वं श्रुत्वा कुम्भकर्णः रावणाय सदुपदेशं ददौ। "भ्रातः, सीतायाः अपहरणमेकमनुचितं कार्यम्। भवादृशेन पराक्रमिणा नेत्थं कर्तव्यमासीत्। परपत्नीनामपहरणं धर्मविरुद्धमिति नीतिशास्त्राणि उद्घोषयन्ति"। परन्तु मदोन्मत्तेन रावणेन नैतदङ्गीकृतम्। केवलं शत्रुविनाशः एवास्मत्प्रधानं कर्तव्यं सम्प्रति इति तस्य चिन्तनमासीत्। भ्रातुः मानसिकीं परिस्थितिं विज्ञाय, तस्य प्रबलमनोवेदनाञ्चाऽवगम्य कुम्भकर्णः शीघ्रमेव युद्धाय कृतनिश्चयोऽभवत्।

गमनसमये पुनः कुम्भकर्णेनोक्तं– "भ्रातः, मम काचित्प्रार्थना, मम मरणं यदि भविष्यति तर्हि तदा तु सीतां रामाय प्रददातु" इति। कुम्भकर्णः स्वरथमारुह्य सेनया सह युद्धक्षेत्रमविशत्। युद्धक्षेत्रे प्रविष्टं स्वभ्रातरं कुम्भकर्णं वीक्ष्य विभीषणः समुदितानुरागेन तन्निकटमगमत्। रामशरणे समागन्तुं तमनुरुन्धे। कुम्भकर्णेन रामस्य प्राशस्त्यमवगतं, तथापि इत्थमूचे, "भ्रातः मम ज्येष्ठभ्रातरं वञ्चयितुं नैवाहं प्रभवामि। शत्रुपक्षस्वीकरणं नाम स्वपक्षस्य वञ्चनमेव भवति खलु। तदर्थं भ्रातः, गच्छ त्वं रामान्तिकं, प्रसन्नो भव, अहं तु स्वधर्मं पालयिष्यामि"। इत्युक्त्वा विभीषणं प्रेषयामास कुम्भकर्णः।

अतिभीकराकृतिः अमितशक्तिशाली कुम्भकर्णः, वानरसेनां रणक्षेत्रे नितरां तुतोद। वानरसेना क्रमेण दौर्बल्यमवाप। वानरवीराः दिशि दिशि पलायिताः। अन्ये प्रमुखवीराः नील-अङ्गद- सुग्रीव-हनुमत्सदृशाः अपि प्रताडिताः हतोत्साहिनो जाताः।

कुम्भकर्णेन दृष्टं लक्ष्मणस्य शराघातैः राक्षसवीराः पराजिताः, अन्ये बहवः रणाङ्गणे मृताश्च इति। तेन कुम्भकर्णः स्वरथं लक्ष्मणस्यान्तिकमनयत्। तद्दृष्ट्वा हनुमान् लक्ष्मणं स्वभुजयोरारोहय्य प्रोन्नतकायो कुम्भकर्णस्याभिमुख्यमकरोत्। तदा निशितशराघातैः लक्ष्मणः कुम्भकर्णस्य रथं दध्वंसे। तस्य सारथिं च प्रापयामास यमालयम्। कुम्भकर्णस्य शस्त्राणि च बिभेद।

तथापि युद्धनिपुणः कुम्भकर्णः नैव परास्तः। कुम्भकर्णः सुग्रीवस्य निकटमगच्छत्। तस्य प्रताडनं प्रारभत भीषणरूपेण। परास्तः सुग्रीवः भूमौ निपपात। पतितं तं स्वभुजयोस्समारोप्य लङ्कां प्रति प्रस्थितः कुम्भकर्णः। एतद्दृष्ट्वा रामः स्वतीक्ष्णबाणैः कुम्भकर्णस्य मार्गावरोधं ससर्ज। वायुमार्गेण सह सर्वे मार्गाः निरुद्धाः जाताः कुम्भकर्णस्य। पश्चाद्रामः स्वनिशितशरैरादौ कुम्भकर्णस्य चिच्छेद भुजद्वयं, पश्चात्पादद्वयं चिच्छेद। तथापि कुम्भकर्णः धैर्यं नैवात्यजत्। स्वमुखमेवायुधं कृत्वा युद्धनिरतोऽभवत्।

महद्युद्धं प्रवृत्तम्। कुम्भकर्णेणावबुद्धं यत् मृत्युरपरिहार्य एवेति। तदा सः स्वयं रामाभिमुखो भूत्वा आत्मसमर्पणमकरोत्। तत्र विभीषणं दृष्ट्वा "रावणादिमं मे भ्रातरं विभीषणं रक्ष" इत्युवाच रामं कुम्भकर्णः। तत्पश्चात्कुम्भकर्णेन प्रार्थना कृता "हे राम तव निशितशरैः मम शिरच्छेदं विधाय तच्च शिरः समुद्रे पातय, येन राक्षसवीराः मन्मरणविषयमेव न जानीयुः। कोऽपि मृतशरीरं मे द्रष्टुं नैव शक्नुयात्", इति। श्रीरामः

तत्क्षणादेव स्वधनुषि प्रत्यञ्चां समारोपयत्। त्यक्तश्च रामबाणः, येन कुम्भकर्णस्येच्छा पूर्णाऽभवत्।

तत्समनन्तरमेव रावणस्य पुत्रः अतिकायः युयुत्सुं समुपागतः। लक्ष्मणः तस्मिन् ब्रह्मास्त्रं मुमुञ्च। तेनातिकायस्य शिरः खण्डितमभवत्। कुम्भकर्णस्य मृत्युवार्ता लङ्कां प्रविष्टा। रावणस्य मनः क्षुभितं जातम्। यथा यथा मनसि क्षोभा प्रवृद्धा, तथा तथा तस्य क्रोधोऽपि द्विगुणितोऽभवत्। अथाऽतिकायं, तस्य पुत्रौ कुम्भं, निकुम्भञ्च, स्वपुत्रमिन्द्रजितञ्च युद्धक्षेत्रं प्रैषयद्युद्धाय रावणः। इन्द्रजितः अपरं नाम मेघनाथः। पराक्रमी मेघनाथः कुम्भकर्णस्य वधं ज्ञात्वा स्वयमेव रणक्षेत्रमगच्छत्।

मेघनाथः कश्चनासाधारणयोद्धा। मायायुद्धनिपुणः। अमित-पराक्रमशाली। मेघनाथस्य निशितास्त्रप्रहारैरनेके वानरवीराः स्वर्गातिथयस्संवृत्ताः। वानरसैन्याध्यक्षः भीतभीतोऽभवत्। तदा विभीषणेनोक्तं- "अत्र स्थितेषु सर्वेषु लक्ष्मण एव मेघनाथेन सह योद्धुं शक्नोति, नान्ये" इति। ततो रथारूढस्य मेघनाथस्य हनुमतः भुजोपविष्टस्य लक्ष्मणस्य च मध्ये घोरयुद्धं प्रवृत्तम्। अस्त्रशस्त्राणां घनघोरशब्दः समजनि। सर्वे योद्धारः भयभीताः जाताः।

लक्ष्मणः मायाविनो मेघनाथस्योपरि बाणवर्षामकरोत्। लक्ष्मणः प्रथमं मेघनाथस्य रथं बिभेद, ततस्तस्य सारथिं जघान। रथस्थाः सिंहाः विखण्डिताः। तदा एव कश्चन लक्ष्मणबाणः मेघनाथस्य वक्षःस्थलोपरि स्थितं रक्षणकवचं भिन्दन् तस्य हृदये प्रविष्टः। तथापि मेघनाथः निश्चलरूपेण स्थितोऽभवत्। रथोपविष्टस्सन् स्वभयङ्करधनुषा सर्वशत्रुविनाशनं चिकीर्षति स्म सः।

एतदाभ्यन्तरे महामायावी मेघनाथः मेघेषु निषिन्नो भूत्वा आकाशादेव बाणवृष्टिमकरोत्। लक्ष्मणः श्रान्तोऽभवत्। तदा स्वीयं

प्रसिद्धं नागपाशास्त्रं लक्ष्मणे मुमुञ्च मेघनाथः। तस्य विषप्रभावेन सर्वे वानरयोद्धारः, लक्ष्मणेन सह गतचैतन्याः अभवन्।

वृत्तमिदं सर्वं ज्ञात्वा रामः युद्धक्षेत्रे पतितान् लक्ष्मणादीन् सर्वानपि वीक्ष्य भृशं दुःखितोऽभवत्। नागास्त्रमहिम्ना गतचैतन्यं भूनिषन्नं प्रियसोदरं वीक्ष्य रामभद्रः विदग्धहृदयोऽभवत्। साश्रुमुखेन विभीषणमपश्यत्। तदा विभीषणेन सर्वं घटितं यथा दृष्टं संवर्णितम्।

स्वर्गलोकात् सर्वमेतत्पश्यतः पक्षिराजस्य गरुडस्य मनः संक्षुभितमभवत्। रामस्याश्रुबिन्दून् द्रष्टुमशक्तेन तेन सपद्येव तत्रागतम्। गरुडस्यागमेनैव नागपाशस्थाः सर्पाः भयेन इतस्ततो दधावुः। इत्थं लक्ष्मणः सर्पबन्धमुक्तो जातः।

गरुडः साक्षाद्विष्णुदेवस्यावतारभूतं रामचन्द्रं प्रणम्य रामाज्ञया पुनः स्वर्गलोकमगच्छत्। मेघनाथस्तु सुखेन राजभवनं प्राप। युद्धादागतं स्वपुत्रं महावीरं वीक्ष्य रावणः आनन्दभरितोऽभवत्। पुनरपरस्मिन् दिनेऽपि मेघनाथस्य सम्प्रेषणार्थं चर्चा यदा जाता, तदा सेनापतिभिः सूचितं यत् अद्यापि पुनर्मेघनाथस्य युद्धप्रवेशः उचितः इति। मेघनाथः स्वयमेव युयुत्सुरासीत्।

घोरयुद्धं प्रवृत्तम्। तस्मिन् दिने मेघनाथः महत्या सेनया पुनर्युद्धक्षेत्रमागच्छत्। युद्धशङ्खारावः प्रपूरितः। युद्धे मेघनाथः बहून् वानरवीरान् स्वर्गपुरातिथीनकरोत्। पुनर्लक्ष्मणेन सह सुदीर्घं युद्धं प्रवृत्तं, युद्धक्रमे लक्ष्मणस्यातिशक्तिशालिना अस्त्रेण मेघनाथस्य रथः रक्षाकवचश्च विनष्टे जाते। मेघनाथः एतद्दृष्ट्वा विस्मयमवाप।

पश्चाल्लक्ष्मणेन निश्चितं ब्रह्मास्त्रप्रहार एव सम्प्रत्युचित इति। तत्पश्चात् यदा लक्ष्मणः ब्रह्मास्त्रप्रमोचनाय सिद्धोऽभवत्तदा श्रीरामः लक्ष्मणं वीक्ष्य प्रोवाच, ''लक्ष्मण, ब्रह्मास्त्रस्य उष्णशक्त्या लोकत्रयं

व्यथितं भवति। अत एव मास्त्वस्यास्त्रस्य प्रयोगः स्वार्थसिद्ध्यै''। यदा एतादृशी चर्चा प्रवृत्ता, एतावति काले मेघनाथः मेघेषु निलीनो जातः। कोऽपि मेघनाथं द्रष्टुं न पारयति। परन्तु मेघनाथः मेघानां पृष्ठभागे स्थित्वा एव हठाद्रूपेण महतः ब्रह्मास्त्रस्य प्रयोगमकरोत्।

तस्य शक्तिशालिनः अस्त्रस्य प्रभावेन सर्वे वानरवीराः धराशायिनस्संवृत्ताः। लक्ष्मणोऽपि अधः पपात विगतचेतन्यस्सन्। लक्ष्मणस्य श्वासप्रक्रियायां महती क्षतिः संजाता। स्थितिरुद्वेगपूर्णाऽभवत्तत्क्षणे एव। एतत्सर्वं सैनिकेभ्यः श्रुत्वा रामः सपद्येव युद्धशिबिरात् युद्धभूमिमागच्छत् । तत्र पुनरेकवारं मूर्च्छितं लक्ष्मणं, सुग्रीवम्, अन्यान् च वीरवानरयोद्धॄन् ददर्श। खिन्नचित्तो भूत्वा विललाप। तस्य हृदयं स्तब्धप्रायमभवत्। सः तीव्रवेदनया उच्चैः रुरोद। तद्रोदनं श्रुत्वा वज्रस्यापि हृदयं दलति । सर्वे देवाः देवलोके खिन्ना अभवन्।

रामः किं कर्तव्यताविमूढो जातः। भूमौ चैतन्यविहरितस्सन् पतितं लक्ष्मणं वीक्ष्य रामचन्द्रः भ्रमितेन्द्रियस्संवृत्तः स्वशरीरचिन्तां विहाय लक्ष्मणस्य शरीरं स्पृशन्नालिङ्गन् च दैन्यदग्धान्तःकरणोऽभूत्।

एतदाभ्यन्तरे विभीषणः प्रधावन् तत्र समागतः। प्रथमं तेन वीराधिवीरः हनुमान् भूमौ पतितो दृष्टः। हनुमानपि विगतचैतन्यस्संवृत्त इति विस्मयमाप विभीषणः। विभीषणेन आदौ हनुमान् उत्थापितः प्रयत्नेन। ततो तौ द्वावपि जाम्बवन्तं अन्वविशताम्। युद्धभूमौ जाम्बवानधः पपात विगतचेतन्यः, परन्तु जीवित एवासीत्। उत्थितः ऋक्षराजः जाम्बवान् सर्वानधः पतितान् ददर्श। विशेषरूपेण लक्ष्मणमधः पतितं दृष्ट्वा तस्योज्जीवनं सञ्जीविन्याख्यस्य ओषधिविशेषस्य सेवनेन एव शक्यं भवेदिति समसूचयत्। जाम्बवानायुर्वेदनिपुण आसीत्तेषु दिनेषु। सः हनुमन्तमाहूय

विषयमेनमवोचत्, ''अत्यन्तोपयुक्तस्य सञ्जीविनी-ओषधेरानयने भवदन्य: कोवाऽत्र समर्थ'' इति हनुमन्तं प्रेरयामास। हनुमान् प्रवृद्धशरीर: अमितोत्साहेन तत्कार्यार्थं सिद्धो जात:। जाम्बवता हिमालयगमनमार्ग: सूचित:। अपि च कथमेतामोषधिं ज्ञातुं शक्यत इत्यपि वर्णयामास।

हनुमान् क्रमेण महाकायोऽभवत्। हिमालयपर्वतमार्गे उड्डिडये। तत्र प्राप्य सञ्जीविनीं ज्ञातुमशक्नुवान: सम्पूर्णमपि पर्वतं स्वहस्ताभ्यां वहन् समागत:। यथा यथा संजीविन्या: सामीप्यमवाप लक्ष्मण: तथा तथा लब्धचेतनोऽभूत्तत्प्रभावेन। तस्योषधे: संसेवनेन लक्ष्मणादय-स्सर्वेऽपि वीरा: प्राप्तचैतन्यास्समजायन्त।

मेघनाथ: निकुम्बला-नामकं स्थानं प्राप्य तत्र निकुम्बलादेव्यै महान्तं यज्ञं प्रारभत। शत्रुनिर्मूलनसामर्थ्यावाप्तये विपत्तीनां निवारणाय च यज्ञोऽयं समनुष्ठीयते। यज्ञपरिसमाप्तिपर्यन्तं स्थानं तत् सैनिकै: सुरक्षितं भवेदिति मेघनाथस्याऽज्ञा। सुदृढया व्यवस्थया मेघनाथ: यज्ञाचरणे निमग्नो जात:। विभीषणेन संसूचितं यत् ''यदि मेघनाथ: जेतव्य: तर्हि यज्ञोऽयमसफलो भवेत्'' इति। यतोहि रावणानुज: विभीषण: निकुम्बलास्थानवैशिष्ट्यं, तत्रस्थाया: निकुम्बलादेव्या: महिमानं, मेघनाथस्य च दृढदीक्षां सम्यक् जानाति। विभीषणस्य विवरणमेतत् श्रुत्वा उद्विग्ना: सुग्रीवलक्ष्मणहनुमदादयो वीरा: निकुम्बलां प्रत्यगच्छन्।

लक्ष्मण: स्वीयनिशितबाणानां वृष्टिमुदपादयत्। तत्प्रभावेण राक्षसवीरा: विनाशिता:। हनुमानन्त: प्रविवेश। यज्ञकुण्ड: विध्वस्त:। मेघनाथस्य निकुम्बलादेवीयज्ञ: विफलो जात:। इन्द्रजित् बहुखिन्न: जात:, पश्चात् बहुक्रुद्धोऽपि। क्रोधावेशेन लक्ष्मणहनुमद्भ्यां तीव्रयुद्धमारभत। स्वतीक्ष्ण शराघातैस्तावुभौ पराजितप्रायावकरोत् मेघनाथ:। इत्थं प्रवर्तिते घोरयुद्धे लक्ष्मण: इन्द्रजित: रथध्वजं विखण्डितमकरोत्। पश्चात्तस्य रथमपि

बाणैर्बिभिन्द। तेनेन्द्रजित् स्वमायाशक्त्याऽदृश्यतां गतः, लङ्काञ्च प्राप्नोत्।

लङ्कातः पुनर्युद्धगमनात्प्राक् मेघनाथः पितरं रावणं प्रत्यवदत्– "हे पितः यद्यहं प्राणैर्न प्रत्यागमिष्यं, तर्हि तदा तु सीतामर्पय रामाय", इति। इन्द्रजित् रथारूढस्सन् वायुवेगेन, युद्धोद्घोषणेन सह युद्धभूमिमविशत्। युद्धभूमौ तत्र वानरवीरान् शरैः प्रहरन्नेव लक्ष्मणमन्विषदिन्द्रजित्। लक्ष्मणः अग्रेसरोऽभूत्। उभावपि योद्धारौ परस्पराभिमुख्यं प्राप्य शरान् ववर्षतुः।

लक्ष्मणः तेजोमयमिषुमत्यजत्। सः शक्तिमयो बाणः मेघनाथस्य वामहस्तं चिच्छेद। तेन सः बाहुः धृतेन धनुषा सहैवाधः पपात। अथ लक्ष्मणः अन्यं शक्तिशालिनं शरमक्षिपत् स तु शरः मेघनाथस्य शिरश्चिच्छेद। मेघनाथस्य शिरच्छेदानन्तरं तस्य तेजोमयः कायः दक्षिणहस्तेन त्रिशूलधारिणा सह भूमौ निपपात। अङ्गदः मेघनाथस्य शिरः स्वीकृत्य रामसमीपं गत्वा रामाय तस्य छिन्नं शिरः प्रादर्शयत्। पश्चात् तत् शिरः रामचरणयोस्संस्थापयामास च।

रावणस्य महत् दौर्भाग्यमासीत्। लङ्काधीशः सः स्वपत्न्या मन्दोदर्या सह युद्धभूमौ शिरोरहितं मेघनाथस्य शरीरं ददर्श। रावणस्य हृदयं भग्नमभवत्, दैन्यशकलेषु च विभक्तमिव जातम्। दुःखस्य पराकाष्ठां प्राप्य रावणः मुहुर्मुहुः विललापोच्चैः। ततो क्रोधेन रावणः प्रतिज्ञामकरोत् अहं तेषां सर्वेषामपि शिरः कर्तयिष्यामि ये मेघनाथस्य शिरःच्छेदे प्रत्यक्षरूपेणाथवा परोक्षरूपेण कारणभूताः।

मन्दोदर्याः दुःखस्य तु वर्णनमेव कर्तुं न शक्यते। उभावपि बलशालिनौ कुमारौ मृतौ जातौ। आदावेवाक्षयकुमारः हतः, सम्प्रति मेघनाथोऽपि। सा तत्र मूर्च्छिता जाता। पुनरुत्थायाऽपि सा विललाप

दीना, म्लानानना। उभौ कुमारौ बलशालिनौ गतावेव, सम्प्रति तस्याः प्रियतमो पतिः रावणोऽपि सीतामोहमायापीडितस्सन् मृत्युगृहमेष्यतीति सा भृशं रुरोद। परन्तु रावणः नैवावगच्छति। अहो! विधेः वैचित्र्यम्।

अपरस्मिन् दिने रावणः अवशिष्टान् सर्वानपि राक्षसवीरानाजुहाव। ते सर्वे मायाविनो राक्षसाः, बलशालिनो योद्धारः। सर्वे यदा एकत्रीभूतास्तदा तु सीमाविरहितः सागर इवासीद्रावणस्य सैन्यम्। लङ्कानगरं राक्षसवीरसैन्यप्रपूरितं जातम्। समुद्रवदुपस्थितं सैन्यं दृष्ट्वा रावणेनादिष्टं– ''गच्छत, वीराः! गत्वा शत्रुनिर्मूलनं कुरुत'' इति। सर्वे सैनिका द्विगुणितोत्साहेन रामचन्द्रसैन्यस्योपरि पर्वतवदपतन्। परन्तु रामचन्द्रस्य सैन्ये द्विगुणितोत्साह आसीत्। तत्र कारणं रामपक्षस्य क्रमविजय एव। धर्मस्याप्यस्तित्वं रामपक्ष एवासीत्। अत एव ''रामो विग्रहवान्धर्मः'' इति वदन्ति विज्ञाः।

एवं स्थिते तत्र वानरवीराः राक्षसवीरान् क्रमेण व्यनाशयन्। घोरं युद्धं प्रवृत्तम्। एतद्विज्ञाय लङ्काधिपतिः रावणः स्वयमेव धनुर्बाणैस्सह युद्धभूमौ प्रविवेश अकुण्ठितया विजिगीषया। सम्प्राप्ते लङ्काधिपतौ रावणे रामचन्द्रः युद्धभूमौ स्वसैन्यं उत्साहबलोपेतमकरोत्स्वीयैर्वचनैः। तत्र सर्वेषां वानरवीराणां संरक्षणात्मकं कार्यभारं लक्ष्मण–सुग्रीवाङ्गद–हनुमदादीनां सैन्याधीशानां भुजयोस्संस्थाप्य स्वयं श्रीरामः स्वधनुरुद्यम्य सिंहवज्जगर्ज युद्धभूमौ।

रामकोदण्डविनिर्गताः शराः राक्षसवीराणां मस्तकानि चिच्छेदुः। महतीं राक्षससेनां विनाशयामासुः च। अग्रे सरन् रामचन्द्रः तां युद्धभूमिं विवेश, यत्र रावणः लक्ष्मणेन सह युध्यति स्म। हनुमतः भुजस्कन्धयो–रुपविश्य लक्ष्मणः रावणेन सह घोरयुद्धे संलग्नोऽभवत्। विभीषणः लक्ष्मणस्य साहाय्याचरणे निमग्नः। विभीषणस्य निर्देशेनैव लक्ष्मणः

रावणस्य सर्वाण्यप्यस्त्राणि विफलीचकार। रावणेन दृष्टं यत् विभीषणः सर्वाण्यपि रहस्यानि शत्रवे निवेदयति इति। सोदरस्य ईदृशं कुकर्म दृष्ट्वा रावणः महता कोपेन शिवेन साक्षात् प्रदत्तं घातकं त्रिशूलं शत्रुविनाशकं विभीषणस्योपरि प्रचिक्षेप। विभीषणः भीत्या लक्ष्मणस्य शरणं गतः। शरणागतानां पालनं क्षत्रियधर्म इति लक्ष्मणः त्रिशूलस्य पुरतो स्थितोऽभवत्। त्रिशूलाघातेन लक्ष्मणः गतचैतन्यः भूमौ निपपात।

लक्ष्मणस्य मूर्छावस्थां दृष्ट्वा सर्वे वानरवीराः दुःखिताः जाताः। चैतन्यविरहितं लक्ष्मणं दृष्ट्वा जाम्बवता उक्तं, संजीविन्या एव लक्ष्मणः पुनरुज्जीवितो भविष्यतीति। हनुमान् पुनरानिनाय संजीविनीमोषधिम्। संजीविन्याः महता प्रभावेन लक्ष्मणः पुनरुज्जीवितो जातः। लक्ष्मणः यदा पुनश्चैतन्यमवाप, तदा स प्रथमं विभीषणं दृष्ट्वा बहुप्रसन्नोऽभवत्। तत्रागतेन श्रीरामेण महानानन्दः सम्प्राप्तः। रामेणाजानुबाहुना लक्ष्मणहनुमन्तौ समालिङ्गितौ प्रेम्णा। हनुमतः साहाय्यं रामः बहुधा प्रशशंस।

गुप्तचरैः एषः समाचारः रावणं प्रापितः। गुप्तचरैः प्रेषितमेतं समाचारं श्रुत्वा रावणः दुःखितोऽभवत्। रामलक्ष्मणाविदानीमपि कुशलिनाविति ज्ञात्वा रावणः नितरामप्रसन्नो बभूव। क्रोधोद्वेगेन युद्धवेशे पुनः रथमारुह्य रावणः युद्धभूमिमगच्छत्-शत्रुसंहारार्थम्। रावणस्य रथः अतिविशिष्टगुणोपेतः। रामस्तु पादचारी एव। तस्माद्रावणं हन्तुं रामः समर्थो न भवेदिति धिया शिवेन इन्द्रः आज्ञप्तः स्वीयमतिविशिष्टगुणोपेतं रथं रामाय प्रदातुम्। समुचिते समये मातलिः रथेन सह रामचन्द्रसम्मुखे समुपस्थितोऽभवत्।

रामरावणाविदानीं समानरूपेण परस्परसाम्मुख्यमभजताम्। उभावपि स्वस्वरथयोस्समासीनौ सन्तौ युयुत्सू भूत्वा युद्धक्षेत्रे

व्यवस्थितौ। उभावपि आकाशचारिणौ भूत्वा युद्धमारभेताम्। सर्वे देवा: यक्षदानवगन्धर्वकिन्नरा: रामरावणयोर्युद्धं वीक्ष्य आश्चर्यचकितौ जातौ। उभयोर्मध्ये युद्धमनिवार्यमासीत्। तयोरतिघोरं युद्धं समीक्ष्य केचन देवा: भीता:, खिन्नचित्ताश्च बभूवु:।

रावणस्य रथध्वज: निर्भिन्नो जात: रामबाणप्रहारेण। रावणस्य सर्वेषामस्त्रशस्त्राणां योग्यमुत्तरं प्रदत्तं श्रीरामेण। राक्षसीमपि शक्तिं राम: स्वमानवशक्त्या निष्क्रियामकरोत्। एतदन्तरे रामस्य कश्चन शर: रावणस्य कण्ठं चिच्छेद। तस्य हस्तोऽपि छिन्नो जात:। रावण: भूमौ निपतात। तथापि स: स्वामिततपोशक्त्या पुनरप्युत्थाय युद्धक्षेत्रे रामस्याग्रत: उपस्थितोऽभवत्।

रावणस्यैतादृशीममितां शक्तिं वीक्ष्य राम: दिग्भ्रमितोऽभवत्। सर्वेऽपि देवा: भीतभीता: बभूवु:। राम एकवारमेव बहून् बाणान् प्रक्षिप्य रावणस्य दशकण्ठानपि बिभेद। स्वतीक्ष्णै: शरै: रावणस्य सम्पूर्णमपि शरीरं क्षतं विदारितञ्चाकरोत्। तेन रावण: दुर्बलो भूत्वा भूमौ न्यपतत्। परन्तु किञ्चित्समयानन्तरं स पुनरुत्थाय स्थितोऽभवत् युद्धक्षेत्रे।

रामेण रावणस्य सर्वान्यपि शस्त्राणि निशितशरशकलीकृतानि। तथापि रावण: युयुत्सुरेवासीत्। अन्ते राम: विभीषणस्योपदेशमनुसृत्य ब्रह्मवरप्रसादलब्धमेकं शक्तियुतमस्त्रं तत्याज। चतु:शिरोयुक्तमिदमस्त्रं रावणस्य वक्ष:स्थलं विदीर्य बहिर्निरगच्छत्। तेन स: प्राणहीनोऽभवत्। इत्थं विभीषणसाहाय्येन राम: रावणं गतप्राणमकरोत्। रावणस्य कृद्धमाननं भूमौ निपातत। श्रीराम: स्वरथादवतीर्य रथं पुरिन्द्राय प्रैषयत्।

रावणस्यान्तिमसंस्कारनिर्वहणार्थं रामेण विभीषणस्समादिष्ट:। मृतं

स्वभ्रातरं त्रिजगद्वीरं वीक्ष्य विभीषणः उच्चैः रुरोद। स्वाऽधर्माचरण-स्यैतादृशं फलं प्राप्तं खलु भ्रात्रा रावणेन, इति भृशं दुःखितोऽभूत्।

स्वप्रियभर्तुः मरणवार्तां श्रुत्वा मन्दोदरी रुदन्ती युद्धभूमिं प्राप्नोत्। रावणस्य शरीरं भूमौ पतितमासीत्। मृतशरीरस्योपरि पतित्वा साऽतिदीनं विललाप। प्रियजनानां मरणं हि निरन्तरदुःखमुत्पादयति लोके। सा रुदन्ती एव बहुसमयं यापयामास। किमेतदेव फलं मम पत्युः वैभवभरितस्य जीवनस्य? महेन्द्रादीनामपि जेता रावणो मे भर्ता कयाचिदबलया निहतो जातः! अहो! अधर्म एवात्र कदाचित्प्रधानं कारणम्-इति सा भृशं रुरोद। मन्दोदरी न केवलं रूपलावण्योपेता, अपि तु गुणभूषिता काचित् श्रेष्ठा महिला। रावणस्य मरणं सा सोढुं नैव पारयामास। स्वभर्तुः प्राणसदृशस्योपरि पतित्वा रुदन्ती एव तत्याज प्राणान्।

विभीषणः न केवलं भ्रातुः, अपि तु भ्रातृज्यायायाश्च, अन्येषाञ्चान्तिम-संस्कारान् सम्पाद्य महान्तं समयं यापयामास। असंख्याकानां बान्धवानामन्तिमसंस्कारकरणार्थं विभीषण एवावशिष्टः राक्षसकुले।

कानिचिद्दिनानि शोकोद्वेगैरेव व्यतीतानि। पश्चात् रामः लक्ष्मणमादिदेश विभीषणं लङ्काधिपतिं विधातुम्। पश्चाद्युक्ते मुहूर्ते विभीषणः लङ्काराज्यस्य राज्यसिंहासनमध्यतिष्टत्। नूतनवस्त्रप्रदानेन विभीषणं सत्कृत्य रामः तमालिलिङ्ग प्रेम्णा। ततो सीतायाः आनयनाय विभीषणमादिदेश रामः। रामस्यादेशं शिरसि वहन् विभीषणः सीतां समलङ्कृतामानिनाय रामान्तिकम्। परन्तु रामः हठात् कोपाविष्ठो भूत्वा अचिन्तितरूपेण सीतायाः शीलसम्पत्तिविषये सन्देहं प्राकटयत्। कठोरशब्दैरुच्चैर्जगर्ज च।

सीतामाता विचलिताऽभवत्। कथमेवं रामभद्रः कथयतीति भृशं

दु:खिता जाता। सीतायाः शीलपरीक्षणार्थं अग्निनिर्माणमकरोत् लक्ष्मणः रामाज्ञया। समुज्ज्वलन्तमग्निदेवं सीता हस्ताभ्यां प्रणमन्ती उवाच।"हे अग्निदेव, यद्यहं स्वधर्माचरणे अपवित्रा, तर्हि मां झटित्येव भस्मीकुरु"। इत्युक्त्वा सा साध्वी सीता निस्संकोचेनैवाग्नौ प्रविवेश।

परमपुनीता सीता यदा पावके प्राविशत् तदा पावकः सीतादेव्याः पुण्यप्रभावेन स्वयमेवोत्पीडितो बभूव। तदुत्पीडनमसहमानः पावकः पटपटेति शब्देन सीतां स्वबाह्वोः स्वीकृत्य स्वयमेव रामचन्द्राय सीतां समर्पयामास।

भगवान् शिवः, भगवान् ब्रह्मा च तत्र समागच्छताम्। ताभ्यां द्वाभ्यां सर्वे जनास्संसूचिताः यत् सीतारामौ साधारणमानवौ न स्तः इति। "एतयोः द्वयोः श्रीरामः साक्षाद्विष्णुरेव, सीता च लक्ष्मीदेवी एव" इति। तस्मिन् समये स्वर्गस्थाः सर्वे देवाः महान्तमानन्दमापुः। स्वर्गात् दशरथः समागत्य रामभद्रेण सह ननन्द।"हे रामभद्र! कमपि वरं याचस्व" इत्युवाच दशरथः। रामेणोक्तं- "मम वनवासस्य कारणेन प्राक् भवता परित्यक्तौ माता कैकेयी, भ्राता भरतः च पुनस्स्वीकार्यौ" इति। दशरथः रामस्य धर्मनिष्ठां, त्यागनिरतिञ्च प्रशशंस। एवंविध-मानन्दमनुभूय पुनस्स्वर्गनगरीं विवेश।

बहुकालानन्तरं सीतादेवीं दृष्ट्वा रामः बहु मुमोद। सीतासाहचर्यं पुनः प्राप्य रामः भृशं ननन्द। सर्वे प्रसन्नाः आसन्। तदा रामचन्द्रः विभीषणमवोचत्- "इतो अयोध्यापुरी बहुदूरे वर्तते। यदि किमपि यानमिह भवेत्- तर्हि अस्माकं सुखकरं स्यात्" इति। तदा विभीषणेन पुष्पकविमानं सन्नद्धीकृतम्। पुरा कुबेरेन रावणाय प्रदत्तमिदमद्भुतं विमानं बहुमहिमान्वितम्। विमानं सिद्धं जातम्। सीतारामलक्ष्मणाः प्रधानस्थानेषु समुपविष्टाः। प्रमुखवानरवीरास्तत्रोपविष्टाः। पुष्पक-विमानं आकाशे उड्डिये।

वियद्वर्त्मनि गच्छति तस्मिन् पुष्पकविमाने उपस्थितास्सर्वे ते रामचन्द्रादयः अयोध्यां प्रति प्रस्थिताः। सीतासमीपोपविष्टः श्रीरामभद्रः सीतायै मार्गमध्ये समागतानि स्थानविशेषानि प्रादर्शयत। ''इयं लङ्कापुरी स्वर्णमयी, इदमासीद्युद्धक्षेत्रं, अयं हि वानरवीरविनिर्मितो सेतुः'' इति ब्रुवन् रामचन्द्रः सीतायै तानि तानि स्थानानि प्रदर्शयन् स्वयमपि मनसि तुतोष। विमानं दण्डकारण्योपरि विद्यमानं आकाश मार्गमविशत्। पश्चात् किष्किन्धायामवातरत्। तत्र काश्चिद्वानरी राज्ञ्यः अपि स्वपतीननुगन्तुं विमानमधिरूढवत्यः। ततो विमानं पुनर्यात्रां प्रारभत।

रामचन्द्रस्य मनसि इच्छा समजायत यत् विमानं ऋषेः भारद्वाजस्याश्रमसमीपे अवतरेदिति। यतोहि तत्र महर्षेः भारद्वाज-स्याशीर्वादं स्वीकृत्य गच्छामो वयमिति चिन्तितं रामेण। रामचन्द्रस्य इच्छानुसारं विमानं ऋषेः भारद्वाजस्य आश्रमसमीपे अवातरत्। सीतासमेतं राममभिवीक्ष्य भारद्वाजर्षिः अतीवानन्दितो बभूव। सीताराम-लक्ष्मणान् सादरमाश्रमपदे स्वागतीचकार ऋषिपुङ्गवः। स्नेहपूर्ण-व्यवहारेण नानाकुशलप्रश्नैः रामं तोषयामास ऋषिः।

रामादयस्सर्वेऽपि महर्षेर्भारद्वाजस्य पादयोः पतित्वा प्रणनमुः। ऋषिर्भारद्वाजः स्वहृदयाभ्यन्तरतः शताधिकानाशीर्वादान् व्यतरत्। सर्वे पुनर्विमानयानमुपाजग्मुः।

वायुमार्गेण क्रमेण ते सर्वेऽपि अयोध्यासमीपप्रदेशं यदा प्रापुः तदा रामः हनुमन्तमूचे- ''प्रिय हनुमान् गच्छ! भरतान्तिकम्। अस्माकमागमनसूचनां प्रयच्छ!'' इति। ओमित्युक्त्वा हनुमान् झटित्येवोड्डीय आकाशमार्गेण प्रथमं तु रामस्य परमभक्तं गुहं प्राप। गुहमुवाच हनुमान् यत् सीतासमेतः श्रीरामः सपद्येवायोध्यां प्रवेक्ष्यतीति।

तस्मात्स्थानात्पुनरुड्डीय नन्दिग्राममगच्छत्। नन्दिग्रामे पुनः "अद्यैव भ्रात्रा रामेणागन्तव्यमासीत् किमर्थं विलम्बो भवतीति" खिन्नमनस्को भरतः आत्मत्यागाय संसिद्धोऽभवत्। समुद्विग्नमनसा भरतः शत्रुघ्नमादिदेश "आत्माहुत्यर्थमग्निकुण्डं रचय!" इति। शत्रुघ्नः तथैवाकरोत्। भरतः तस्मिन्नग्नौ प्रविश्य आत्मानमग्नौ समर्पयितुं संसिद्धोऽभवत्। विशालाकृतिर्हनुमान् तस्मिन्नेव क्षणे आकाशाद्भूमौ चुकूर्द, रामागमनसूचनां च भरतायायच्छत्।

आदौ भरतादयः अपरिचितं हनुमन्तं दृष्ट्वा सन्देहं व्यक्तीचक्रुः। तेन हनुमान् रामेण प्रेषितं रामाङ्गुलीयकं भरतायादर्शयत्। अङ्गुलीयकं दृष्ट्वा सर्वे ते आनन्दसागरे न्यमज्जन्।

एतदाभ्यन्तरे पुष्पकविमानमयोध्यायामवातरत्। रामादयस्सर्वेऽपि विमानादवतीर्य अयोध्यायां तत्प्रतीक्षायामादावेव समुपस्थितान् सर्वान् बान्धवान्वीक्ष्य भृशं मुमुदुः। रामः आदौ गुरोर्वशिष्ठस्य पादौ प्रणनाम। पश्चात्कैकेयीं तत्पश्चात्स्वमातरं कौसल्यां प्रणनाम।

भरतः रामचरणपादुकाभ्यां तत्रोपस्थितः। भ्रातरं प्रेम्णा वीक्ष्य तस्मै पादुके समर्पयामास विनम्रभावेन भरतः। पश्चाद्रामचरणयोर्निपपात भरतः। रामः तमुत्थाप्यानुरागेणालिलिङ्ग। भरतं दृष्ट्वा रामस्य नेत्रयोरश्रुबिन्दवः समुत्पन्नाः। तत्पश्चाद्रामलक्ष्मणभरताः स्वपुरातनानि वस्त्राणि परित्यज्य सरयूनद्यां स्नानमकुर्वन्। स्नानानन्तरं राजकुमारोचितानि भव्यवस्त्राणि धारयामासुः। पश्चात्ते सुवर्णरथोपविष्टाः भूत्वा अयोध्यां विविशुः।

वानरराज्ञीनां मध्ये विराजमाना सीताऽपि यथोचितं वस्त्रधारणं कृत्वा रथासीना सती अयोध्यामविशत्। ऋषिणा वशिष्ठेन सूचितं यत् अपरस्मिन् दिने एव रामस्य राज्याभिषेकार्थं समुचितः शुभमुहूर्तः

अस्तीति। ब्रह्मणः निर्देशानुसारं मयेन भव्यभवनं विनिर्मितम्। सुग्रीवस्यादेशं शिरसि वहन् हनुमान् सप्तसमुद्रेभ्यः, सप्तनदीभ्यश्च पवित्रजलान्यानिनाय। लक्ष्मीनारायणाविव स्वर्णसिंहासनासीनौ सीतारामौ पवित्रवाद्ययन्त्रध्वनौ परमपवित्रवैदिकमन्त्रोच्चारणेषु पारम्परिकपद्धत्या मङ्गलस्नानमाचरतुः।

तस्मिन्नतिपवित्रराज्याभिषेकोत्सवे रामस्य स्वर्णसिंहासनं हनुमता धृतं, अङ्गदेन खड्गः धृतः, शत्रुघ्नः श्वेतछत्रेण वायुं वीजयामास। वैदिकविद्वांसः मुनेर्वशिष्ठस्याध्यक्ष्ये रामस्य राज्याभिषेकमकुर्वन् महता संरम्भेन। सर्वे जनाः प्रमुदिताः अजायन्त। परम्परामनुसृत्य असुरगुरुणा शुक्राचार्येण, देवगुरुणा बृहस्पतिना च पारम्परिकपद्धत्या रामस्य राज्याभिषेकोत्सवः समनुष्ठितः। तदा प्रमुदितचित्तः श्रीरामः स्वकनिष्ठ-सोदराणां मस्तकानि मुकुटैरलञ्चकार।

सिंहासनासीनौ सीतारामौ आगतेभ्यः सर्वेभ्यः अतिथिवर्येभ्यः समुचितानुपहारान् समर्प्य तानपूजयताम्। सर्वेऽपि बान्धवाः, सर्वेऽपि जनाः महान्तमानन्दमन्वभवन्।

राजा रामचन्द्रः प्रेम्णा हनुमन्तं परमभक्तं स्वसमीपमागन्तुमादिदेश। हनुमन्तं प्रेम्णा समालिलिङ्ग राजा रामचन्द्रः। सम्पूर्णेऽपि रामकार्ये हनुमत्सदृशः कर्मवीरः नान्यः कोऽप्यासीत्। हनुमतः साहाय्येनैव रामचन्द्रः साफल्यमवाप। सीतामाताऽपि हनुमतः प्रशंसामकरोत्। प्रेमपूर्णैराशीर्वादैः हनुमन्तं तोषयामास। सुन्दरमौक्तिकमालां हनुमते प्रायच्छच्च। समुद्रमध्यस्थायाः लङ्कायाः अधीशाय राज्ञे विभीषणाय रामचन्द्रः भगवतो रङ्गनाथस्य मूर्तिं प्रेषयामास। सूर्यवंशीयैः सर्वैरपि राजभिराराधितो प्रभुः रङ्गनाथः। तत्पश्चाद्रामः अभ्यागतान् सर्वानपि प्रेम्णा प्रीतिवचनैश्च संपूज्य स्वस्वस्थानेषु प्रेषयामास।

ततो राजा रामचन्द्रः चतुर्दशभुवनेषु सर्वैरपि संस्तुतस्सन् शुद्धहृदयैर्भ्रातृभिः सहस्राधिकवर्षपर्यन्तं राज्यपालनमकरोत्। रामस्य राज्यं चतुस्सागरपर्यन्तमपि विस्तृतमासीत्। रामराज्ये कोऽपि दुःखितः नाभवत्। धर्मपरायणस्य रामस्य व्यवहारेण सर्वे जनाः नित्यप्रमुदिताः आसन्।

इति युद्धकाण्डः

सङ्क्षिप्तरामायणकथा समाप्ता

श्री वी. कृष्णमूर्तिवर्यस्य परिचयः



श्री वी. कृष्णमूर्तिमहोदयानां जन्म 1941 तमे अगस्तमासे तमिलनाडुप्रान्तस्य डिंडुगल-नामके स्थानेऽभवत्। एते स्ववृत्तिं विज्ञानेन सह प्रारब्धवन्तः, भाभा-परमाणु-अनुसन्धान-केन्द्रे वैज्ञानिकरूपेण गणितस्य पृष्ठभूमिं केन्द्रे संस्थाप्य नववर्षाणि यावत् स्वयोगदानं प्रदत्तवन्तः। एतदनन्तरं चत्वारि वर्षाणि यावत् एते एकस्मिन् विज्ञापनसंस्थाने प्रबन्धकत्वेन कार्यं कृतवन्तः। सांख्यिक्यां, संगणकानुप्रयोगेषु च स्वविकसित-कौशलेन सह योगदानं दत्तवन्तः। एतदनन्तरं इंजीनियर अनुप्रयोगेषु 'इंजीनियर्स इण्डिया' इत्यस्मिन् संस्थाने एकवर्षस्य सेवाकार्यं कृतवन्तः। त्रयोदशवर्षाणि यावत् 'कम्प्युट्रॉनिक्स इण्डिया' इत्यस्य संस्थानस्य सॉफ्टवेयर निर्यातकत्वेन कार्यं विहितवन्तः, अनुप्रयोगाणां च विस्तृतश्रृंखलां सम्पादयन्तः इमे वैश्विकस्तरे सॉफ्टवेयर उत्पादानां निर्यातं कृतवन्तः।

स्वव्यवसायस्य 26 वर्षाणि औपचारिककेन्द्रे यापनानन्तरम् एते विगत 34 वर्षेभ्यः विभिन्नसर्वकारीयनिकायेषु असर्वकारीयसंस्थानेषु च परामर्शदातृत्वेन स्वदायित्त्वं निर्वहन्तः सन्ति। तेषु प्रमुखाः सन्ति - विज्ञानं, प्रौद्योगिकविभागश्च, शिक्षा मन्त्रालयः, सूचना प्रसारणमन्त्रालयः, भूतलमन्त्रालयः, रक्षा, आकाशवाणी, दूरदर्शनम्, राष्ट्रीयशिक्षक-शिक्षा-परिषद्, इग्नू-सी. ई. एम. सी. ए. इत्यादयः। एतैः नूतन-शैक्षिकतकनीक्याः विकासः कृतः यस्याधारेण श्रीलंका-मलेशिया-सिंगापुर-मालदीव-भारतादिदेशानां विभिन्नविश्वविद्यालयेषु इंजीनियरमहाविद्यालयेषु च कार्यशालानाम् आयोजनं कृतम्। एतैः सॉफ्टवेयर निर्यातकत्वेन शिक्षायाश्च प्रसारे अनेकशः विश्वस्तरीया यात्रा कृता। कोविड प्रतिबन्धैः वयं गभीरचिन्तनं कर्तुं विवशीभूताः अभवाम।

अन्तर्जालीय-संचारतन्त्रमस्माभिः निर्मितं, यत्र उत्पाद वेब-आधृतघटकरूपेण परियोजनायां श्रवण-दृश्यरूपेण च विकसितम्।

श्री कृष्णमूर्ति महाभागैः श्री गोपालस्य काव्यकृतौ प्रौद्योगिकी-रचनात्मकता-आङ्ग्लानुवादश्च विहिते। प्रसिद्धसंस्कृतविदुषा आचार्येन प्रो. चौडूरि उपेन्द्र रावमहोदयेन कंबरामायणस्य शोभनं संस्कृतसंस्करणं संक्षिप्तरूपेण सुष्ठु विनिर्मितम्। अपि च, सस्कृत-ऑडियो अपि आचार्य चौडूरि उपेन्द्र राव महाभागेनैव विनिर्मितम्। ग्रत्थेऽस्मिन् विभिन्नप्रकाशनस्त्रोतृभ्यः कानिचन चित्राणि स्वीकृतानि।



आदित्यहृदयस्तोत्रम्

महर्षिणा वाल्मीकिना विरचिते श्रीमद्रामायणे समुपलभ्यते आदित्यहृदय-स्तोत्रमिदम्। रामायणस्य युद्धकाण्डे 107 तमे अध्याये विद्यमानेऽस्मिन् स्तोत्रे 31 श्लोकास्सन्ति। युद्धपरिक्षान्तस्य रामस्य उत्साहवर्धनाय परमोत्कृष्टेन मुनिना-अगस्त्येन प्रोक्तमिदं स्तोत्रम्। अस्मिन् स्तोत्रे सूर्यस्य स्तवः कृतः। मनुष्यः सूर्यप्रभावेणैव शक्तिमान् भवतीति स्तोत्रेऽस्मिन् प्रतिपादितम्।

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥1॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपागम्याब्रवीद् राममगस्त्यो भगवांस्तदा ॥2॥

राम राम महाबाहो श्रृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसे ॥3॥

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपं नित्यमक्षयं परमं शिवम् ॥4॥

सर्वमंगलमांगल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ॥5॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम्।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्॥6॥

सर्वदेवत्मको ह्येष तेजस्वी रश्मिभावनः।
एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः॥7॥

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः।
महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः॥8॥

पितरो वसवः साध्यावश्विनौ मरुतो मनुः।
वायुर्वन्हिः प्रजाः प्राण ऋतुकर्ता प्रभाकरः॥9॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्।
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः॥10॥

हरिदश्वः सहस्त्रार्चिः सप्तसप्तिर्मरीचिमान्।
तिमिरोन्मथनः शम्भुःत्वष्टा मार्तण्डकोंऽशुमान्॥11॥

हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः।
अग्निगर्भोऽदितेः पुत्रः शंखः शिशिरनाशनः॥12॥

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवंगमः॥13॥

आतपी मण्डली मृत्युः पिंगलः सर्वतापनः।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः॥14॥

नक्षत्रग्रहताराणामधिपो विश्वभावनः।
तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते॥15॥

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥16॥

जयाय जयभद्राय हर्यश्वाय नमो नमः।
नमो नमः सहस्रांशो आदित्याय नमो नमः॥17॥

नम उग्राय वीराय सारंगाय नमो नमः।
नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते॥18॥

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥19॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः॥20॥

तप्तचामीकराभाय रवये विश्वकर्मणे।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे॥21॥

नाशयत्येष वै भूतं तमेव सृजति प्रभुः।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः॥22॥

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम्॥23 ॥

देवाश्च ऋतवश्चैव ऋतूनां फलमेव च।
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः॥24॥

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव॥25॥

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम्।
एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि॥26॥

अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम्॥२६॥

एतच्छ्रुत्वा महातेजा, नष्टशोकोऽभवत् तदा।
धारयामास सुप्रीतो राघवः प्रयतात्मवान्॥28॥

आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान्।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान्॥29॥

रावणं प्रेक्ष्य हृष्टात्मा जयार्थे समुपागमत्।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत्॥30॥

अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः।
निशिचरपतिसंक्षयं विदित्वा
सुरगणमध्यगतो वचस्त्वरेति॥ 31 ॥

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः ।।

New BBC

न्यू भारतीय बुक कॉरपोरेशन
208, 2nd –फ्लोर
4735 / 22, प्रकाषदीप बिल्डिंग
अन्सारी रोड, दरियागंज,
नई दिल्ली– 110002
फोनः 23280214, 23280209, 49841634
E-mail: deepak.nbbc@yahoo.in